गंधवद्भिरेवाणुभिरारभ्यंते कार्यत्वे सति गंधवत्वात्। पार्थिवपरमाणुद्व्यणुकवत्॥
30 विवादाध्यासिताः परमाणवो गंधवंतस्तैव द्व्यणुकान्यारभंते गंधवत्वात्। ये पुनर्निर्गंधान्यारभंते
न ते गंधवंतो। यथा निर्गंधजलाद्यारंभकाः परमाणवः न चैते निर्गंधवंतः॥ तस्माद्गंधवंत्ये
व द्व्यणुकान्यारभंते न॥ न च दृष्टांतासिद्धिः नियमारंभे सजातीयाभ्यामयारंभाभ्युपग
॥३०॥ मात्॥ अन्यथा निर्गंधस्य जलादेर्नीरसस्यानलादेर्नीरूपस्य चैव नस्यानुपलंभप्रसंगः॥ र
वत्त्वसिद्धिकद्व्यत्वचवंति द्व्यणुकानि तथाभूतैरेवाणुभिरारभ्यंते कार्यत्वे च द्व्यणुकान्या
रंभंते शीतत्वात्। ये पुनरशीतान्यारंभंते न ते शीताः। जलपरमाणवः। यथाऽशीततेजोद्व्य ॥३०॥

एकाद्यानंभकाइत्यादिस्वयमूहनीयं।तस्मात्सजातीयानामेवारंभकत्वं नविजातीयानामितिस्थितं।तथा
पिशरीरस्यकथंपार्थिवत्वस्यविनिश्चयः।इत्थं।कुंडादीनांपरारत्नावपिशरीरस्यप्रत्यभिज्ञानात्गंधस्ययावत्
द्रव्यभावित्वात्।घटवत्।यथाहिघटादौपार्थिवकुंदशोषदशायामपिगंधोनुवर्त्तते।शैत्यादयस्तुकुसुमा
दिवासितजलादिगंधवन्निवर्त्तते।तथाशरीरेपीतितद्वत्पार्थिवत्वमवधार्यंइति।इंद्रियमाह।इंद्रिय त
मिति।गंधव्यंजकंयदिंद्रियंतत्घ्राणमिति।रूपाद्यव्यंजकत्वेसतिगंधस्यैवव्यंजक[illegible]त्वादित्यर्थः।गंधो
पलब्ध्यातावत्करणमात्रंसिद्धं।क्रियायाःकरणनिष्पाद्यत्वनियमात्।तच्चाप्यकारिजनकत्वे।सतितद्
आघ्राणजनकत्वात्।तच्चद्रव्यंसंयोगाश्रयत्वात्पार्थिवंसगंधवत्वात्।गंधवत्वंचरूपाद्यव्यंजकत्वेसतिगं

घ्राणाभिव्यंजकत्वात् कुंकुमगंधाभिव्यंजकतैलवदिति। सर्वप्राणिनामिति। प्राणिभेदेनेंद्रियप्रवृत्तिवैचित्र्यं निवारयति यदि
३। गंधाभिव्यंजको घ्राणशक्तिरस्ति पृथिव्याः किं न सर्वैव पृथिव्येवमित्यत आह। जलाद्यनभिभूतेति। अत एव श्लेष्माद्य
भिभवे सति गंधो न गृह्यत इति भावः। घ्राणमिति लोकप्रसिद्धमित्यर्थः। तृतीयं पृथिवीकार्यमाह। विषय इति। य ति
द्यपि शरीरमपि विषयस्तथापि शरीरत्वेनैव तदसाधारणं पुरुषार्थसाधनमिति दर्शयितुं तदेव रूपं तस्य
दर्शितं। वक्ष्यमाणे तु विषयत्वमेवासाधारणमतस्तदुच्यते। द्व्यणुकादिप्रक्रमेणेति। द्व्यणुकमादिर्यस्य क्र प्र२
मस्य स तथोक्तः। तेनारब्धो निष्पादितः। मृत्त्वमिति मृत्तिकात्वं पाषाणत्वं प्रस्तरत्वं स्थावरत्वमुद्भिदत्वं सा राम
मान्यविशेषाः। तन्मृत्तिकात्वं केषु वर्त्तत इत्यत आह। तत्रेति। मृद्विकारा मृत्तिकारूपा विकाराः। के पाषाणा ३१

ल

इत्यत आह। उपलेति। उपलग्रावाणः। मणयो माणिक्यादयः। वज्रं हीरकं। आदिग्रहणात् गैरिकादयः। स्थावरा इति। वृक्षाः
पुष्पफलवंतः स्कंधशाखाशाखिलिनः। तृणान्युपादिनि। ओषध्यः फलपाकांता यवादयः। गुल्माः झाड्यः २ ऊ
लताः कूष्मांडीप्रभृतयः। अवतानाः केतक्यादयः। वनस्पतयो विना पुष्पं फलिनः। अत्र पाषाणग्रह
णेनैव हरितालादयः। स्थावरग्रहणेनैव पुष्पादयः॥ शरीरग्रहणेनैव तदवयवा मांसास्थ्यादयः॥
तद्विकारादयश्च क्षीरघृतादयः इंद्रियग्रहणेनैव तदवयवाः। विषयग्रहणेनैव घ्राणकादयः।
वृक्षग्रहणेनैव काष्ठादयः। तृणग्रहणेनैव तालादयः। ओषधिग्रहणेनैव तद्विकारास्तंदु नै२
ल तैलादय इति॥ ननु को यं घ्राणकादिक्रमो घ्राणकरणवशमात्राभावात्। तत्सहेतु वस्तो
वस्तुन्यत्र सिद्धाः। ते च चाक्षुषद्रव्यं चोदि वमहांतो द्रव्यस्य चाक्षुषं तां प्रति रूपविशेषवत्त्व

ता१

क्रिया॰ ३२

महत्त्वस्यापिकारणत्वात्॥ अन्यथा दूरदूरतरादौ तत्प्रकर्षानुविधानानुपपत्तेः। महत्त्वे सति रूपवत्वा

त्ते सावयवाः कार्याश्च। अन्यथा अवयवगतसंख्याद्यनुपपत्तौ महत्त्वानुपपत्तेः। नित्यत्वे प्रकर्ष

३२ काष्ठाप्राप्तात्यभावस्य महत्त्वविरोधात्। न च त्रसरेण्ववयवा अपि सावयवास्तदवयवक

ल्पनायां प्रमाणाभावात्॥ न हि त्रसरेणु [illegible] वत्ते पि महत्तां तो रूपविशेषवत्तां महत्तां चा

क्षुषत्वप्रसंगात्॥ यद्यपि ते महत्त्वव्यावृत्तेरणुपरिमाणान्निरवयवत्वाद्य प्रवयवं वितास्तथा

॥३२॥ पि बहुत्वान्महत्कार्यद्रव्यमारभ्यंते। तथा च परमाणव एव त्रसरेणावयवा इति कुतो द्व्यणुकं॥

त्वे उच्यते॥ महतः कार्यस्य कार्यद्रव्यारब्धं नियमात् द्व्यणुकसिद्धिः अन्यथा परमाणुभिरेव बहु

त्वसंख्योपेतैर्महद्रव्यारंभे घटादेरपि तैरेवारंभादंतरालिकाल्पतरादिकार्योपलंभवि ॥३२॥

ऽधात्। तथा च त्र्यणुकवदनुपलब्धितरे खापरे खंडो गोघटादिरपि स्यात्। तथा च संस्थानभेदानुपलंभे तद्भिन्नं घटत्वादि
कमपि नोपलभ्येत। न चारभ्यारंभकत्वं इति तत्तुल्यं पंभोपपत्तिः। मूर्तानां समानदेशत्वानुपपत्तेः। न्यूनाधिकदेशतया समा
नदेशत्वेप्यविरोध इत्यपि नास्ति। न्यूनदेशतया हि यत्र नास्ति तत्राधिकदेशस्य स्थितिर्माविरोत्सीत्। स्वदेशे तु विरुध्या
देवेत त्राप्यविरोधि हेमरूर्न त्वं जह्यात्। अवयवरूपादिवत्। संयोगिन्यपि वा देशेन्यूनाधिकदेशतया समानदेश
त्वाविरोधः स्यात्। न चोदं चनावच्छिन्ने देशे घटादिः संयोगे न वर्त्तते कथं तर्हि चरमादितंत्वपकर्षणेप्यन्तरत
मादिपटोपलंभ इति वाच्यं। नाशप्रतिबंधकविगमे ऽवस्थितसंयोगेभ्यः खंडपटोत्पत्तेः। आद्यादितंत्वपकर्षणे
त्वयाप्येषैव रीतिरनुगंतव्या। तथा हि। द्वितंतुकादिपर्यंतं समवायिकार्यविनाशे खंडपटानुत्पत्तौ वतं ६
त्वातिरिक्तं न किंचिदुपलभ्येत। नन्वेषविचारो द्व्यणुकेपि समानः। नेरपि हि यद्विबहुभिः कार्यमारभ्येत

घटादयोप्यारभ्येरन्। तथा चांतरालिककार्यपरंपरानुपलंभप्रसंगः। अथ ते त्रसरेणुभिरेवारभ्यन्त इति नियमः। परमाणुभिः
हातन्मोवा प्रष्टो २ स एवारभ्यत इति तुल्यं। विशेषो वा वक्तव्यः। उच्यते। यथा ह्यवयवावयविप्रसंगः परमाणुषु विश्राम्यति तथावयवावयव य
संख्यापकर्षः क्वचिद्विश्राम्येत। न च द्वित्वमपकर्षकाष्ठा द्वित्वैकत्वयोः संभवेत्। तत्रैकत्वमनारंभकं। अवयवसंयो
33 गानुपपत्तावसमवायिकारणाभावात्। अनेकसंख्याभावे वावयविनोवयवापेक्षयाधिकपरिमाणानुपपत्तेः।
अवयवापेक्षयावयविनोधिकपरिमाणत्वनियमात्। एकस्यावयवस्याविभागानुपपत्तौ तत्कार्यस्य विनाशासं
भवेन्नित्यत्वप्रसंगादिति। तथा च द्वित्वमपकर्षपर्यंतं तदादिरयमारंभः। तत्र द्वाभ्यां परमाणुभ्यामारब्धं का ह्नानारभेत
पर २ ह २ र्यं न महत्। तथात्वे तस्य कारणाभावात्। तदपि द्व्यणुकं यदि नारभेत यदि च द्वित्वसंख्यायुक्तमेवारभेत तदुभयथापि राम
तदुत्पादानवैयर्थ्यं स्यात्। तस्मात्तेन महद्द्रव्यमारभ्यमाणं बहुत्वसंख्यायो[illegible]गेनैवेति नियमः। न बहु ३३

ण्डुकवत् परमाणवोऽपि बहुत्वसंख्यामाश्रित्य महत्कार्यमारप्स्यन्त इति युक्तं। अनियमारंभस्य निषिद्धत्वात्। कारणका
रणस्य च कार्याकार्यजातीयानारंभकत्वात्। न हि तंतवः पटमारभंते न (कारणं वी) ञाव इति। तस्माद्विवादाध्या
सितास्त्रसरेणवो न निरवयवद्रव्यारभ्याः सावयवद्रव्यारभ्या इति वा महत्वे सति कार्यत्वात् उभयवादिसिद्धद्व्यणु
कारभ्यश्च घटकवत्। घटवद्वेति। एवं न हि द्व्यणुकमपि न निरवयवद्रव्यारब्धं सावयवद्रव्यारब्धं वा कार्यद्रव्यत्वात्
त्रसरेणुवत् घटवद्वेति स्यात् न स्यात् अनवस्थाप्रतिहतत्वादिति द्व्यणुकादिक्रमसिद्धिः॥ ७॥ पर्यवसिता पृ
थिवी॥ ॥श्रीराम॥ अथेदानीमपो निरूपयति। अप्स्वभिसंबंधादित्यादि। अप्त्वं नाम सामान्यविशेषः तेनाभि
संबंधादित्यादिरेवं व्याख्येयं। तासां द्रव्यत्वसिद्धये गुणानाह रूपरसेत्यादि। तत्र प्रमाणं सूत्रयति एतेचेति।
एवं तत्र पृथिव्या यथा सूत्रकारवचनात् गंधादयः सिद्धास्तथाप्सु रूपादयः सिद्धा इत्यर्थः। तथा च सूत्रं रू

३५ परसस्पर्शवन्त्य आपो द्रवाः स्निग्धाश्चेति। यथावाच्छूषवचनात्सम्प्रसंख्यादयः पृथिव्यां तथाप्स्वपि। यथापतनोद्देशात्पृथिव्यां गुरु-
त्वं तथाजलेऽपि। यथोत्तरकर्मवचनात्पृथिव्यां संस्कारस्तथा [illegible]प्स्वपीति। एवंगुणवत्त्वेन द्रव्यत्वे सिद्धे पृथिव्यादिव्यवच्छेद-
हेतोरस्यास्य व्यवस्थाहेतून्गुणविशेषानाह। शुक्लमधुरशीता एव रूपरसस्पर्शा इति। सह स्वरूपोऽग्निसंयोगेऽ-
प्यपरावर्तमानमभास्वरं शुक्लमेव रूपमप्सु न हि पार्थिवे पटस्फटिकादौ वर्तमानं शुक्लमपि रूपमग्निसंयोगान्न
परावर्तते अपरावृत्तमपि तेजसि भास्वरं तस्मादनेन विशेषेण रूपं तद्व्यवस्थाहेतुः एष तु विशेषः पृथिवीरूपस्य पा-
कजत्वप्रदर्शनेन तेजोरूपस्य भास्वरत्वव्याख्यानेन सूचितः। उक्तयुक्तेरेव जलादिरूपस्यापाकजत्वं पार्थिवाद् दृष्टभागास्तत्र
क्वाथेन पच्यंते। एतेन रसो व्याख्यातः। न हि पार्थिवेऽपि क्षीरशर्करादौ वर्तमानमपि माधुर्यं पाकेन न व्यावर्तते इह तु सहस्रशः स्व राम
पच्यमानेऽपि माधुर्यमेव ईषत्स्वभावं तु तत्तदपि तथैव यत्तु नरं धुसिंधुमेदेन क्षारादिरपि रस उपलभ्यते स देशमृत्तो- ३४
ता

घ१

कषायस्यैव पार्थिवद्रव्योपाधिकः कथमन्यथा तस्यैव नपीतमुक्तस्य मधुर एव । एवमपां स्पर्शोपि शीत एव क्वचित्तु सन्नपि
तेजः स्पर्शाभिभवान्नोपलभ्यते तदपगमे पुनरुपलब्धिरिति तदेभिर्विशेषैस्तु रसस्पर्शा अप्सु व्यवस्थापकाः इत्युक्तं ॥ ८२
स्नेहस्तु स्वरूपत एवेत्याह स्नेहोम्भस्येवेति । अत्र केचिदाहुः । न स्नेहो जलधर्मः । तैलादिवज्जलेनुपलब्धेः । नापि पृथिव्या
दिविशेषगुणः सर्वपृथिव्यव्यापकत्वात् तस्मात्पार्थिवविशेषेषु तैलवसादिषु उपलभ्यमानः सामान्यविशेषोयं ग
व्यमाहिषादिषु दधित्ववदिति तदसत् स्निग्धस्निग्धतरस्निग्धतमादिभेदेन सातिशयत्वात् न च गोमहिष्यादिषु गुण
मनाश्रित्य तारतम्यमस्तीति नहीषन्मधुरातिमधुरवत् क्षीरातिशयेन गौरिति भवति तस्मादतिशयस्य गुणैकनिमि
त्तत्वात् सामान्यविशेषतया सामान्येऽसंभवात् गुणविशेष एव स्नेहः किं च स्निग्धद्रव्यावयवपरंपरायां स्निग्धता
दापरमाणु स्नेहः स्यान्न च परमाणुषु पृथिवीपरजातिरस्ति व्यवस्थापकाभावात् क्षीरत्वादिवद् द्वयिष्यतीति चेत् त

वै१

यपिपरमाणुष्वभावात्पाकजरूपरसविशेषव्यंग्यं हि क्षीरत्वादि तथा च पाकांतरेण तन्निवृत्तौ क्षीरत्वादेर्निवृत्तिप्रसंगात्।
न च सत्यां व्यक्तौ सामान्यस्य निवृत्तिरिष्यते तथा चैविवक्षितसत्ताकाः संभवमात्रेण तत्तस्याभिव्यंजकाः सर्वपार्थिव
35 परमाणूनां क्षीरत्वापत्तौ तदारब्धसर्वकार्यस्य पृथिवीत्ववत् क्षीरत्वापत्तेः द्व्यणुकादौ क्षीरत्ववत्संभविष्यतीति
चेत् तदारंभकेषु परमाणुषु तद्व्यवस्थाहेतोः क्षीरत्ववत् गुणविशेषस्याभावात्। भावे वा स एव स्नेहः न च य म प
वरूपादयो व्यवस्थाहेतवः तेषां घटत्वादिव्यवस्थापकत्वान्न च कारणसाम्यं स्तीति घृततैलवसानां बीजक्षीरमां राम
स्नपि सयोनित्वादत एव नालिकेररसव्यापि स्नेहे तैलत्वं रसादिसारूप्याच्च घृतमिति व्यपदेशः तस्मात्परमाणुषु वर्तमानः ३५
कारणगुणप्रक्रमेणा त्र्यावयविपर्यंतमायातो गुणविशेषः स्नेह इति युक्तं न च घृतादिष्वेव स्नेहोपलब्धेः सातिशयो हि
स्नेहस्तत्र प्रतीयते गुरुत्वमिव सुवर्णे वस्तुतस्तु सर्वजलसाधारणी स्निग्धताऽन्यथा भे[illegible]व सकेन सक्तुसि

कतादीनांसंग्रहोनस्यात्सहिस्नेहद्रवत्वकारि तःसंयोगविशेषोधारणाकर्षणहेतुः नवासौकेवलद्रवत्वहेतुकः काव
कावनादिभिरतिद्रवीभूतैरपिवालुकाद्यसंग्रहात्नापिस्नेहमात्रकारितःस्यात्नेघृतादिभिरप्यसंग्रहात् तस्मात्सक
लजलहेतुकः संग्रहोमवंस्तत्रद्रवत्वमिवस्नेहमपिसांसिद्धिकमेवस्थापयतितथापिनैमित्तिकद्रवत्वमिवनैमित्तिकः
पृथिव्यामयंभविष्यतिपार्थिवेष्विवघृतादिषुचोपलब्धेरितिचेन्नतदन्वयव्यतिरेकानतुविधानात् नहियथाजतुघृता
दिषुपावकसंसर्गात् द्रवत्वमुत्पद्यतेतद्विरोधिसलिलावसेकात्तुनिवर्ततेतथास्नेहः तस्मात्पाकजन्तथाविध
रूपरसगंधादिमद्भिःपरमाणुभिर्द्व्यणुकादिक्रमेणघृतादिद्रव्यमारभ्यतेतत्रचोपष्टंभकतयानिमित्ततामा
पन्नाःपानीयावयवास्तेषांसंयुक्तसमवायेनस्नेहस्तत्रोपलभ्यतेइतिस्थितंसांसिद्धिकंवद्द्रवत्वमंभस्येवेत्यनुक
र्षणार्थश्चकारः तैलक्षीरादिषुपार्थिवत्वेसिद्धेसंयुक्तसमवायात्तदुपलब्धिः शैत्यवत् तेषांपार्थिवत्वमेवकथमि

त्रिवेन्नैलस्य भौमानलेंधनत्वात् क्षीरस्य च पिंडीभावेपि भस्माभिज्ञानात् घृतवद्वस्त्यादि स्वयमूहनीयं। तास्तु पूर्ववदेव द्विवि-
36 धाः। नित्यानित्यभावात् तुशब्दोप्यर्थः। पृथिवी तावत् द्विविधा। आपोपि तथैव पूर्ववदिति कार्यतया परमाणुतया च
यथा पृथिवी नित्यानित्या च। आपोपि तथेत्यर्थः। तत्रेसत्रविभक्ति [illegible] विपरिणामेन तासां कार्यं त्रिविधं शरीरेंद्रि-
यविषयसंज्ञकं तदेतन्निगदव्याख्यानं पृथिव्यामिवात्रापि तात्पर्यमूहनीयं। आपः कुत्रचिच्छरीरारंभिका द्रव्या-
रंभकत्वात् पृथिवीवत् द्रव्यस्य हि द्रव्यारंभणयोग्यता शरीरेंद्रियविषयभावेन व्याप्ता (?) यदेतेष्वेकमप्यारभते त-
दन्यदपि यन्नैकं न तदन्यदपीत्यन्वयव्यतिरेकाभ्यामुपलंभात् ततो यद्यापः शरीरं नारभेरन्नेंद्रियविषया- राम
वपि नारभेरन्नेवैवं तस्मात्कुत्रचिच्छरीरमप्यारभंत इति स्थिते कीदृक् शरीरमित्यपेक्षायामाह। योनिजमे- श्री २ ३६
वेति। नन्वनुपलब्धेर्बाधितं तदित्यत आह। वरुणलोक इति व्यवहितविप्रकृष्टत्वान्नोपलभ्यते। न त्वभावाद्वा
शुक्रशोणितयोर्नियमेन पार्थिवत्वात् पार्थिवेन पार्थिवीयानारंभात् तत्तद्योनिजमेवेति

आगमादुपलब्धेरिति भावः। ननु भंगुरस्वभावत्वादपां तदारब्धं कथमुपभोगायतनं तदित्यत आह। पार्थि
वेति। यथा कठिनत्वान्न दारब्धमाप्यावयवोपष्टंभात्तदुपभोगसमर्थं तथा आप्यत्वात्तद्रवमपि पार्थिवावयवोपष्टंभात्तदुपभो गा २
समर्थं। द्विजातीयानामारंभकत्वमात्रं निषिद्धं न तु परस्परानुग्रहोऽपीति भावः। इंद्रियमिति। यद्रसोपलब्धिसाधनमिंद्रियं तदप्याप्यं। अ
प्रति त्रापि रसोपलब्ध्या स्वरूपसिद्धिः। आप्यत्वं च रूपाद्यव्यंजकत्वे रसाभिव्यंजकत्वात् सक्तुरसाभिव्यंजकोदकवत्। प्राणि के ५
मेदेनेंद्रियप्रसक्तिवैशिष्ट्यनिवारणाय सर्वप्राणिनामिति। अन्यावयवानभिभूतैरिति वाताद्यनभिभवे जडत्वाज्जिह्वात्वादिनि प्रति
मावन्न किं नामधेयं तदित्यत आह। रसनमिति। तृतीयां विधामाह। विषयस्त्विति। आप्यत्वे हिमकरकयोः कठिनीभावोपपत्तिं
द्रवत्वे वक्ष्यतीति। ७। तेजसो लक्षणमाह। तेजस्त्वाभिसंबंधादित्यादिव्याख्यानं पूर्ववत्। तस्य द्रव्यत्वव्यवस्थेयं गुणा
नाह। रूपस्पर्शेत्यादि। अत्र प्रमाणं सूचयति। पूर्ववदेषां सिद्धिरिति। तेजो रूपस्पर्शवदिति सूत्रकारवचनात्। रू

दे

श्री

पय्यवो चाक्षुषवचनात् रूपसंख्यादयः। अद्भिः सामान्यवचनाद्द्रवत्वं उत्तरकर्मवचनात्संस्कार इति पृथिवीवदेते सिद्धाः

प्रसिद्धा इत्यर्थः। तेजस्त्वव्यवच्छेदकान्विशेषगुणानाह। शुक्लं भास्वरं च रूपमिति स्वार्थः। पृथिव्यादिरूपाद्यवच्छि

37 नन्विभास्वरत्वं सामान्यविशेषः स च रूपान्तरप्रकाशकत्वेन व्यज्यते तद्वत् रूपं तेजस एव तेन भास्वरं रूपं ते

ज इति लक्षणार्थः। शुक्लमिति स्वरूपकथनं पच्यमाने घनरूपसन्निधिकृतरक्तत्वाहितादुपलंभस्त्वद्विरहेवं

ङ्गारकादिमहसि शुक्लस्यैवोपलंभादिति प्रतिपादनार्थं। न च तत्रापि बिंबनतया तोयरूपसंक्रान्त्याधाव

ल्यप्रतीतिरिति वाच्यं। अपां रूपेण विजातीयानभिभवात्। नहि जलप्लाविना नीलादयस्ते नं तत इति उक्तम् ए

एवकारश्चेद्दुवामीकरचक्षुरादिष्वनुपलंभहेतुकां विप्रतिपत्तिमपनेतुं तेषां तैजसत्वेनोक्तत्वानुमानात्। ३७

अनुद्भूतत्वेनानुपलंभो न त्वभावात्। तदपि द्विविधमिति निरूपवर्तात्पर्यं। कार्यभेदमाह शरीरादित्रय

वस्यकीइतिर

भितिशरीरमादिर्यस्य त्रयस्य तत्तथा न पार्थिववत्तैजसं शरीरमुपलभ्यत इत्यत आह। शरीरमिति। तैजसमपि
शरीरारंभकत्वेतोयवल्लाघनीयं ज्वलदनलकल्पेन कस्तेनोपभोग इत्यत आह। पार्थिवेति। इंद्रिय
माह। इंद्रियमिति यद्घाद्यव्यंजकत्वे सति रूपस्य व्यंजकमिंद्रियं। तत्तैजसं सर्वप्राणिनामिंद्रिआ
लिभेदेनेंद्रियप्रकृतिवैचित्र्यशंकानिवारणाय तत्सद्भावे रूपोपलब्धिप्रमाणं तेजसत्वे च स्पर्शरसा
द्यव्यंजकत्वे रूपाभिव्यंजकत्वं प्रदीपवत्। अत्र केचिदाहुः। अप्राप्यकारि चक्षुरधिष्ठानासंबद्ध
कत्वान्तर र्थग्राहित्वात् रसनादिवत् पृथुतरग्रहणाच्च यदि च प्राप्यकारि चक्षुः स्यात्तत् स्वतोधिकपरिमाणं न
तुनरस्य गृह्णीयात् न खलु रंजिकापरमुच्छेद्यं छिनत्ति शाखाचंद्रमसोस्तुल्यकालग्रहणाच्च यदि च गत्वा गृह्णी
यात् निकटस्थमाशु प्राप्नुयात् दवीयस्तु चिरेणेति न तुल्यकालमुपलंभं भवेत् अनुभवंति तु उन्मीलयन्त्येव नयने

३८

शास्त्रांशीतमयूखं चेतिशाखाभ्रपटलैः स्फटिकाद्यंतरितोपलब्धेश्च यदि हि प्रतिघातिना स्फटिकादि
द्रव्येण वि ष्टंभादप्राप्तत्वेनाधिकं नादीतत स्मादप्राप्यकारि चक्षुस्ततो न तैजसमिति तदसत्। अधिष्ठा
नासंबद्धार्थग्राहित्वे प्रदीपेनैकांतिकत्वात् पृथुतरस्य ग्रहणस्यापि पृथ्वग्रतया तद्वदेवोपपत्तेः तुल्यका
लग्रहणं त्वसिद्धमेव तदभिमानस्य कालसन्निकर्षेणोपपत्तेः। अचिंत्यो हि तेजसो ला
घवातिशयेन वेगातिशयो यत्प्राचीनावलंबूडावलंबिन्येव भगवति मयूखमालिनि भवनोदरे प्रा
लोक इत्यभिमानो लौकिकानां॥ केचित्तु संसर्गिद्रव्यतया निस्सरदेव ना यनं तेजो बाह्यालोकेनेक
ता यतं युगपदेव तावदर्थेन संसृष्टमिंद्रियमुत्पादितवदिति शाखाचंद्रमसोस्तुल्यकालग्रहणमु
पपद्यत इति समाधानमाहुः। तदसत्। पृष्ठभागव्यवस्थितार्थोपलंभ डासंगात् इंद्रियप्राप्तये ह्या

राम
३८

र्जेवाव स्थानमप्युपयुज्यत इति स्फटिकाद्यंतरितोपलब्धिरपि प्रसादस्वभावतया स्फटिकादीनां तेजोगतेरप्रतिबं
धकतया प्रदीपप्रभावदुपपन्नेति येषां तन्मते प्राप्यकारित्व हेतुस्तेषामप्राप्यत्वाविशेषादव्यवहितवत् कुड्यादिव्यवहि
तमपि किन्न गृह्णीयात्। न हि व्यवधायकं प्राप्तिविघातादन्यत्र सत्त्व एव कार्यविरोधि तथात्वे तस्मिन् सति
न कश्चित् कार्यं भवेत्। योग्यं योग्येन गृह्यते तत्र योग्यत्वान्न गृह्येत न तु व्यवहितत्वादित्यपि स्फोर्ये स्वरूप म
योग्यतायास्तदानीमप्यपरावृत्तेः क्षणिकत्वेपि प्रत्यासीदतां सहकारिणामतिशयजनकत्वात् न त्वप्रत्या
सीदतः सहकारिप्रत्यययाः समानसहस्रेणापि भावनातिशयानतिप्रत्यासत्तिश्च बौद्धनये निरंतरोत्पादोऽस्मा
कं वद्वयोः संयोग इति स्यात्। न च हृत्क्षसारस्यार्थेन निरंतरोत्पादो नापि संयोगस्ततस्तदाश्रयस्यातीं
द्रियस्य गतिक्रमेण निरंतरोत्पादेन वा संयोगेन वा त्यवशिष्यते तदेतदग्रे निरूपयिष्यत इत्येषा दिक्॥ क

धमेतदेवं तथा नान्यद्रूपमादीयत इत्याह। अन्येति। अन्येत्युपलक्षणं समानजातीयेनापि बलवता दुर्बलमभिभूयते कथ
मन्यथा सौरेण तेजसा नयनमभिभूतं रूपग्रहणे समर्थं भवति वक्ष्यति लोकप्रसिद्धमित्यर्थः। विषय इति संज्ञा यस्य
श्रो॰ २ तच्चतुर्विधं भौमं। भूमौ भवं। दिव्यं दिवि भवं। उदर्यं उदरे भवं। आकरजं खनिराकरस्तस्मात्संजातं। काष्ठेनाग्निदिका
39 सात्पार्थिवानुपलक्षयन्ति तदेवेन्धनं दीपनं यस्य तत्तथोक्तं ऊर्ध्वज्वलनमेव स्वभावो यस्य तत्तथा जातिनिर्बाध द्वि
र्घं स्वभाव इत्युच्यते। परार्थतामाह। पवनस्वेदनादिसमर्थमिति। पाको विक्लेदनं रूपादिपरावृत्तिर्वा स्वेद
नं वातश्लेष्मणोरुपशमः। आदिग्रहणाद्धीतदुःखशमनं दाहदुःखात्सादनं च दिव्यमबिन्धनं। आप एवेन्ध राम
नं यस्य तत्तथा किं तदित्याह। सूर्यस्यादं सौरं विद्युदं विरजभा आदिग्रहणादुल्कादि इत्यपि द्रष्टव्यं भुक्तस्या न ३ ए
हारस्याक्षियत इत्याहार ओदनादिस्तस्य रसादिपरिमाणमनिमित्तमुदर्यं भुक्तस्य वाहारोयस्य पार्थिवा
व्यं २

घरूपमत्यन्तकार्यैरसैः आदिग्रहणान्मलधातुस्तद्विकारास्त एव परिणामास्तेषां निमित्तं आकरजं सुवर्णादि आ
ग्रहणात् रजततांम्रकांस्याष्टकं कथं पुनरेतत्तैजसं यद्यपि गुरुत्वादयः संयुक्तसमवायेनाप्युपपद्यं तेत
थापि नैमित्तिकद्रवत्वादेव पार्थिवत्वं सिध्यति घृतादिवत् न च घृतादिद्रवत्ववदेवास्य ताग्निसंयोगादेत
त् द्रवत्वं क्षीयते तथाऽदर्शनात् विशेषविरोधस्य चादूषणत्वात् । तथा च वक्ष्यते नश्यत्क्षीयमाणद्र
वत्वेन सत्प्रतिपक्षत्वं असाधारणत्वात् । किं च योपि तेजसमिश्रितसुवर्णे । तेनाप्यत्र पार्थिवभागरूपं भक
एवैष्टव्यः न च सोऽद्रवदशायामद्रवरूपवान् तथा वाक्षीयमाणद्रवत्वतत्राप्यस्तीति विपक्षैकदेशवृत्तित्वा
द्विरुद्धो हेतुः तस्मात्परिभावनीयमेतत्सूरिभिः ॥ उच्यते ॥ रूपवत्त्वं याता वदेन ज्ञितयां तभूतमिति स्फुटं ।
तत्र सांसिद्धिकद्रवत्व शैत्ययोरभावात् स्नेहाविनाभूतद्रव्यान्तरासंग्रहानुपपत्तेश्च न जलत्वं । न च नैमि

त्तिकद्रवत्वात्पार्थिवं। विपक्षेबाधकाभावात्। नहि निमित्तान्द्रव्यांतरेद्रवोत्पत्तिः। किंचिद्विरूपाद्विनवोर्ध्वज्वलनतिर्यक्पवनवज्जा
५० तिनियतमेतदेकदेशवृत्तित्वान्न नतद्विशेषनियतं सर्पिर्वादीनां भिन्नजातीयत्वात्तस्मात्तन्नद्योगनियतादृष्टसहका
र्यग्निसंयोगनिबंधनं द्रवत्वमुत्पद्यमानं कर्मवन्न पार्थिवत्वव्यवस्थाहेतुः। किंच पार्थिवं रूपमग्निसंयोगादसति विरो
ध्यंतरे परावर्त्तते सति तु नेति नियमः। दह्यमानेषु घटपटादिषु दर्शनेन तन्नलसंबंधाच्च तेष्वेवादर्शनेन कार्यकारण
भाव व्यवस्थितेः। तदिदं सुवर्णादि निरंतरं ध्मायमानमपि पूर्वरूपं न जहाति। न च रूपांतरमापद्यते। तेन जलवद
पार्थिवमवधार्यते। तेनैव द्रव्यांतरेणाप्रतिबद्धत्वात्तु पष्टंभकोपि पार्थिवो भागः सदृशरूप एवानुवर्तते। यत्तु पुट
कादिना रक्तसारता दृश्यते तन्मिश्रीभूतानाभिभावकत्वेनतद्द्रव्योपगमादिति युक्तमुत्पश्यामः। तदयं प्रयोगः। सु राम
वर्णादि न पार्थिवं अत्यंताग्निसंयोगे परावर्त्तमानरूपत्वात् जलवत्। तैजसं वैतत्पार्थिवाप्याभ्यामन्यत्वे स ४०

त्रिरूपवत्वात्सूर्यालोकवत्। एतेन पारदादिव्याख्यातं। आप्यादन्यत्वस्य द्रव्यान्तरसंग्रहासिद्धेः। सांसिद्धिकद्रवत्वस्याग्निसं
योगादक्षीयमाणत्वेन बाधितत्वात्। अविंधनेतेजो वै धर्म्योपपत्तेस्तजसत्वे वागमसंवादादिति। नन्वभास्व
ररूपत्वान्नैतत्तेज इत्यपि स्यात्। न स्यादसिद्धेः। न हि मध्याह्नेप्रदीपो बहिर्भास्वरो नोपलभ्यत इति न भास्वरः।
उपष्टम्भकद्रव्यरूपाभिभवेनैवानुपलम्भोपपत्तेः। अथ नयनरश्मिवदनुद्भवादेवानुपलम्भः किं न स्यात्। न
स्यात्। सुवर्णादिद्रव्यस्यानुपलम्भप्रसंगात्। न ह्यनुद्भूतरूपं द्रव्यमुपलभ्यते। ग्रीष्मोष्मणोपि निशि दर्शनप्रसंगात्।
अभिभवेपि मध्यंदिनोल्काप्रकाशानुपलम्भवदनुपलम्भप्रसंगस्तुल्य इति चेत्। न। न हि रूपस्याभिभवेन द्रव्यं नोपलभ्यते
महारजनरूपाभिभूते धवलिम्नि पटानुपलम्भप्रसंगात्। तस्मादभिभूतत्वाद्रूपमेव न दृश्यते। सक्तुमाषराशिप्रविष्टम
रीचवन्महाप्रकाशसमाहारान्नोपलभ्यत इति सर्वमवदातं। कथं तर्हि सुवर्णादौ साद्युपलब्धिरित्यत आह। न वेति। प्रति

सू॰ कि॰

नं१

नियतेंद्रियग्राह्यगुणाश्रयतया पृथिव्यादीनां सुप्रसिद्धत्वाद्गंधादिक्रासक्रमेण व्याख्यानाद्वतेजोनंतरं वायुलक्षणमा

५१ ह [redacted] वायुत्वाभिसंबंधाद्वायुरिति॥ लक्षणार्थः पूर्ववत्। तस्य द्रव्यत्वसिद्ध्यर्थं गुणानाह। स्पर्शेति। एवं स्पर्श

वत्तया द्रव्यत्वे सिद्धे वायुत्वव्यवस्थाहेतुविशेषेणमाह। स्पर्शोस्येत्यादि। अस्य वायोरनुष्णस्पर्श इति तेजसो व्या

वृत्तिः अशीत इत्य[illegible]ः अपाकज इति पृथिव्याः तत्रानुष्णाशीतत्वमस्य प्रत्यक्षसिद्धं। अपाकजत्वं पार्थिवस्य अ४

र्शवत्त्वात्तोयस्पर्शवत् पाकजत्वं हि विशेषांतरव्याप्तं उपलब्धमतोन्यथा सर्वगुणानां पाकजत्वप्रसंगात् त

दितो व्यावर्त्तमानं स्वव्याप्यमुपादाय तद्विरहिणि पार्थिवे विश्राम्यतीति प्रतिबंधसिद्धिः सोस्ति वायावित्यत्र प्रमाणं राम

सूत्रयति गुणविनिवेशेनेति। तथा च सूत्रं। वायुः स्पर्शवानिति संख्यादिषु सूत्रकारसंमतिमाह। अरूपिष्विति। रू ४९

परहितेषु वर्त्तमानानामेषामचाक्षुषत्वं वदता सूत्रकारेण रूपरहिते वायोः सद्भावः स्वीकृतः प्रमाणं तु संख्या

ए८ भरवा

२भक परिमाणपृथक्त्वसंयोगविभागवत्तायांवायोर्द्रव्यत्वं संख्यापरिमाणपृथक्त्वसंयोगैर्विनाद्रव्यारंभानुपपत्तेः विभागेनविना
संयोगविनाशानुपपत्तौ आरब्धस्यविनाशानुपपत्तिः। परत्वापरत्वाभ्यांविनासंयुक्तसंयोगाल्पीयस्त्वभूयस्त्वा
संभवेमूर्तत्वानुपपत्तेरिति संस्कारेसूत्रकारानुमतिमाह। तृणइति। तृणेकर्मवायुसंयोगादितिवचनादित्यर्थः। ति
मतरेण थाचप्रयोगः। तद्रूपवत्द्रव्याभिघातासंभवेतृणकर्म स्पर्शवद्वेगवत्द्रव्याभिघातजं विशिष्टकर्मत्वान्नदीपुरा
हताकाशादिकर्मवदितितदेतत्कंपलिंग इत्यत्रस्फुटीभविष्यतिए तेनारूपस्पर्शोवायुरितिलक्षणमूहेतेतथावानु वानू४
ष्णाशीतपाकजस्पर्शोवान्वायुरिति सिध्यति सोयंयदि अनित्यएवावयवानवस्थास्यात् कस्यचिन्नाशेनिराश्रयंका
र्यमापद्येत अथनित्यएववह्निः आमणिकः स्यात् परमाणुस्पर्शस्यातीन्द्रियत्वात्स्थूलानां इतिशब्दकंपानांप
रमसूक्ष्मद्रव्याभिघाताद्यहेतुकत्वादित्यत आह। सचायमितिद्विविधोनित्यश्चायं यथासंख्यमणुकार्यभावादि

नित्यश्चा८

नितत्र तयोरणुकार्ययोर्मध्ये कार्यलक्षणश्चतुर्विधश्चतस्यापि विधा दर्शयति शरीरमिति तत्र तेषु मध्ये शरीरमयोनिजमेव न
४२ — नु पार्थिववद्योनिजमपि वायोर्द्व्यारंभकत्वेन तेजोवच्छरीरारंभकत्वस्थिते क्वचिदित्यत आपेक्षायामाह। मेरुलोकवायुलो रू के ०
क इति। ननु तस्य तादृशाभावे वा व्यापाराभावात् करचरणाद्यभावाद्वाहारविहरणाभावात् संस्थानविशेषाभावे द्वि
न्द्रियाश्रयत्वानुपपत्तेः कथं भोगायतनत्वमित्यत आह। पार्थिवेति। उपलक्षणं चैतत्। भूतांतरानुग्रहस्यापि सं
भवात् इंद्रियमिति रूपादिषु मध्ये स्पर्शोपलंभकं यदिंद्रियं तद्वायवीयं सर्वप्राणिनामिति पूर्ववद् अत्रापि स्पर्शोपलब्ध्या
करणमात्रसिद्धेः संयोगाश्रयतया द्रव्यत्वे रूपादिषु मध्ये स्पर्शस्यैव व्यंजकत्वात् वायवीयत्वं अंगसंगिसलिलशै
त्याभिव्यंजकव्यजनवातवदित्यूहनीयं कस्यचिदेव वा योरिंद्रियत्वं न सर्वस्येति नियमे हेतुमाह। पृथिव्यादीति। अत राम
एव कुष्ठाद्युपहतायां त्वचि न स्पर्शोपलंभ इत्यपि संधिः तस्याधिष्ठानमाह। सर्वशरीरस्यापीति। सर्वशरी ४२

रव्यासस्यस्पर्शोपलंभादित्यवधातव्यं तदवस्थानं च शारीरं न खलोमदर्शने केशानां संयोगि द्रव्यमात्रत्वं त्वगिंद्रियाना
श्रयत्वादित्यभिप्रायः लोकप्रसिद्धां तस्य संज्ञामाह। त्वगिति। ननु दृष्टिन्नयवद्देहव सहत्त्वावरणमात्रं त्वगित्युच्य
ते। तच्च पार्थिवं। प्रत्यक्षसिद्धं वेति नेंद्रियं न च वायवीयमित्यत आह। इंद्रियमिति न त्वचो वमुख्यतो वायवीयमिं
द्रियमुच्यते किंतु लक्षणयातत्स्थमिंद्रियं त्वगितिव्यवह्रियते लोके नेत्यर्थः। विषयस्त्विति नु शब्देनोपलभ्यमा
नत्वात्स्पर्शादिव्यादित्रयाद्यावर्त्तयति उपलभ्यमानस्पर्शाधिष्ठानभूतो न तु लोपेप्यत इत्यर्थः। न चानुपपन्नमेतत्
स्पार्शनप्रत्यक्षत्वाद्वायोस्त्वगिंद्रियव्यापारानंतरं वायुर्वातीति प्रतीतेः न च स्पर्शमात्रमेव तत्र प्रतीयते वायुस्त्वनुमी
यत इति युक्तं शीतोष्णद्रव्यापनायकत्वेनानुमितस्य पवनस्य तथाप्रतीतिरिति युक्तं बाधकाभावात् अस्य वा त्वष
(२ बाधक) त्वं द्रव्यस्य हि स्पार्शनत्वं वा त्वक्षुषत्वेन व्याप्तं तदितो व्यावर्त्तमानं स्पार्शनत्वमपि व्यावर्त्तयतीति चेन्न विपक्षे बा

धकाभावात्। नहि चक्षुरूपाभ्यां त्वचः स्पर्शोऽस्य वा किंचिदुपकर्त्तव्यं येन मिथोऽपेक्षा स्यात्तथात्वे वा ज्ञात्यं घेन घटाद
योऽपि त्वचा नोपलभ्येरन् रूपाभावेन द्रव्यवत्स्पर्शोऽपि नोपलभ्येत उष्णं शीतं शिलातलमित्यत्रोष्णशी
५३ तस्पर्शाधिष्ठानयोस्तेजःपयसोश्चक्षुषानुपलंभेऽपि स्पर्शस्योपलब्धेः द्रव्यस्य तु चक्षुषानुपलभ्यमानस्य स्प
र्शनेन कदाचिदप्यनुपलंभान्नैवमिति चेत् अपार्थिवेत्तर्हि सर्वत्र त्वचा स्पर्शमात्रोपलब्धिरस्तु द्रव्योपलब्धिस्तु
व चक्षुषैव क्वचिदनुमानेन वायुवद्भविष्यति प्रत्यभिज्ञानमपि तद्वदेवोपपत्स्यते अथवभ्रांतो यथा तथास्तु प्रमा
णचिंतायां तूपलभ्यमानस्पर्शाश्रयसहितएवोपलभ्यते अनुभवस्य तदुपकृत्वात् अत एवायं तेज राम
सोऽप्यत्र वोपलंभ इष्यते गुणयोग्यतामात्रस्य त्वक्चक्षुषोर्द्रव्यावगाहनादिति यद्वा वायावपि समा ४३
नमेतत्। तथाच प्रयोगः। वायुः प्रत्यक्ष उपलभ्यमानस्पर्शाधिष्ठानत्वात् घटवदिति॥ अत्रोच्यते॥

ख्या १ द्रव्यग्रहणयोग्यतांतर्भूतयोग्यताकानि खलु सं॰ परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वकर्माणि। एवं च
मीषांद्वीद्रिययाह्यतानिर्वहति। यदि त्वा वायुरुपलभ्येत संख्यादयोप्युपलभ्येरन्। न चैतत्तत्ताद्द्रव्यमपि नो
पलभ्यते तुल्योपलंभयोग्यत्वात्। न च त्वचा वायोरेकत्वादिसंख्या वा हस्तवितस्त्यादिपरिमाणं वा पृ
थिव्यादिभ्यः सजातीयतो वा पृथक्त्वं संयोगविभागौ वा परत्वापरत्वे वा कर्म वोपलभ्यते तुल्योपलंभयो
ग्यत्वेन वा सिद्धा दूरात्संख्यादीनामनुपलंभेपि शाखातालतमालादीनामुपलंभादिति चेन्न। दूराद्
दोषेण संख्यादयो नोपलभ्यंते। तथापि योग्यताया अनिवृत्ते दोषनिवृत्तावुपलंभात्। तस्मात्
४२ द्रव्योपलंभसहचरोपलंभयोग्यतानां संख्यादीनां सर्वथानुपलंभादवगम्यमानस्पर्शोपि न पवन इति। तदे
तस्याश्रयस्य स्पस्यापि नानात्वं संमूर्छनेनानुमीयत इत्यत्र स्फुटी भविष्यति। अत एवानुपलभ्यमानसंख्यादि

कु॰कि॰

रूपत्वात् पृथिवीस्पर्शवत् न वायं जलानलयोरनुष्णाशीतत्वात् न वायं पार्थिवो ...

केनायं तेजसी अपि त्वचा नोपलभ्यत इति विनिश्चयः तथा वोपलभ्यमानस्पर्शाधिष्ठानत्वमप्यनैकांतिकमसिद्धं

५५ कुतस्तर्हि प्रत्येतव्य इत्यत आह। स्पर्शेति। स्पर्शः शब्दो धृतिः कंपश्च लिंगानि यस्य स तथोक्तः। तथा हि। योयं रू

वत् द्रव्यासमवेतस्पर्शः स क्वचिदाश्रितः स्पर्शत्वात् पृथिवीस्पर्शवत्। न वायं जलानलयोरनु

ष्णाशीतत्वात् न च पार्थिवो रूपेण समानाधिकरण्यमसिद्धं। योग्यानुपलब्धेर्न वायोग्यरूपमिह भूर्विष्य

तीति वाच्यं। अभिभावकस्य रूपांतरस्यानुपलब्धेरभिभवानुप[illegible]पत्तेः। पाकजत्वेन पार्थिवरूप

स्पर्शयोस्तुल्ययोगक्षेमत्वेन स्पर्शस्योद्भवे रूपस्यानुद्भवायोगात्। अन्यथा पृथिव्यां रूपस्पा[illegible]नु

द्भवेपि स्पर्शानुद्भवप्रसंगात्। किं वानुपलभ्यमानस्पर्शाधिष्ठानस्य पृथिवीत्वे गुरुत्वमपि स्यात्। न च राम

पवनापूरितस्य चर्मपुटादेरपूरणदशातो धिकमवनमनमुन्नीयते धूमापूरिते नेदमनैकांतिकमिति ४४

रूपत्वात्॥ पक्षपार्थिवो नासावेयं पापादिस्पर्शः। न च रूपेण सामानाधिकर ५

वेत् अलंधूमदर्शनायां तत्रापि न रश्मिविशेषहेतोरेवं निर्विशेषस्याप्रतीतेः तस्माद्विवादाध्यासितं द्रव्यं न पृथिवी रूपरहित
का त्वात् आशावत् गुरुत्वरहितत्वादाकाशवदिति स्पर्शाश्रयतया चतुर्थं द्रव्यं सिध्यति एवमसति रूपद्रव्याभिघाते यो
यं पर्णादिषु शब्दसंतानः स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः अविभज्यमानावयवद्रव्यसंबंधिशब्दसंतानत्वा
त् दंडाहतभेरीशब्दसंतानवदिति। एवं गुरुणो द्रव्यस्यापतनं धृतिः ततोनुमीयते वायुः। तथाहि। प्रयोगः। न
भसि तृणतूलस्तनयित्नुविमानादीनां धृतिः स्पर्शवत् द्रव्यसंयोगहेतुका अस्मदाद्यनधिष्ठितद्रव्यधृतित्वात्[१] धि ४
स्य लिंगत्वमुक्तं एतेषां वतुर्णामपि कार्यत्वान्निस्तरंगः अप्रतिबंधः तिर्यग्गमनं स्वभावो यस्य स तथोक्तः अदृ
ष्टवदात्मसंयोगनिबंधनमस्य तिर्यग्गमनं तेन कः पुरुषार्थ इत्यत आह। मेघादीति। आदिग्रहणाद्देहायसा
नां भोमानां वयानपात्रपांसुपटलादीनां जलानलयोश्च परिग्रहः धारणादीत्यादिशब्दात् स्पर्शाभिव्यक्तिदीपन

१ विमानादीनां

७ संनिपातोपीत्यर्थः। ऊर्ध्वगमनेनानुमीयते नन्वतींद्रियस्यगमनमप्यतींद्रियं तत्कथं तेन ×७

नं ४

योः परिग्रहस्तेषु समर्थः तस्याप्रत्यक्षस्यापीतियद्यपिपरमाणुगुणानामतींद्रियत्वात् स्पर्शोस्यप्रत्यक्षसिद्धत्वाद
र्थादवयविवर्त्तित्वेप्यवयविनश्चद्व्यणुकादिक्रमेणारंभात्पवनजातीयस्यनानात्वं धर्मिग्राहकप्रमाणादेव
सिद्धंशक्यते तस्यस्पर्शवत्तयानुमानुं तथापिशिष्यबुद्धिव्युत्पादनाय नोद्याभास निराकरणायवनानत्वानुमा
नप्रपंचमाहतस्येति। अथकिमिदंसंमूर्छनामित्यत आह। संमूर्छनमिति। समानजवयोस्तुल्यवेगयोर्विरुद्ध
दिक्क्रिययोर्विरुद्धयोर्दिशोः क्रिययोस्तयोः संनिपातोमेलकः संयोगविशेष इति यावत् वायोरिति
उक्तत्वेन स्पर्शवतोपिविवक्षितंनन्वतींद्रियस्यनानात्वेद्वेगसंगावपिअतींद्रियावित्यत आह। सो यो ३ राम
चीतिसंनिपातोप्यनुमीयत इत्यत आहानुमितेनेअथकेनलिंगेन तदनुमीयत इत्यत आहतृणादिगमने ४५
नेत्यत्राप्यूर्ध्वेत्यनुषंजनीयं तेनानेनतृणादीनामूर्ध्वगमनेनकार्येणप्रत्यक्षसिद्धेनकारणमूर्ध्व

१ सामर्थ्यमस्ति

गमनं पवनस्यानुमेयं न चैतद्व्यणुकरूपस्य त्रसरेणुरूपस्य वा वायोस्तृणान्यूर्ध्वं नेतुम् उत्साहं इत्यत आ मस्ति १
हासावयविनो शिति अवयवानामवयवित्वेन तृणादिप्रेरणोपाधिकं महत्त्वमभिप्रैति । एवमियता प्रबंधेन संस्
स्यादीनां कर्मपर्यंतानां वायावतीन्द्रियत्वमुक्तं । तिर्यग्गमनस्वभावस्य कथमूर्ध्वगमनमित्यत्रोपपत्तिर्दर्शि
ता तथा वायुतोप्यधिकम् ऊर्ध्वगतिशीलं द्रव्यांतरं नाशंकनीयमिति सूचितं निम्नाभिसर्पणस्वभावानामप्यपां यथा द्रव्यां
तरसंमूर्छनादूर्ध्वगमनं तथा पवनस्याप्यूर्ध्वगमनोपपत्तिरिति । अचैवप्रयोगः प्रतिघात्यात् वायोः प्रतिहंता वा
युरन्यस्तत्प्रतिहंतृत्वात् देवदत्ताद्यङ्गदत्तवत् अभेदे प्रतिघातानुपपत्तिः संयोगस्य द्विष्ठत्वात् प्रतिहन्यते चायं निष्ठ २
वायुः तिर्यग्गमनस्वभावस्यत्र्य लाघभावे सति ऊर्ध्वगमनासमवायिकारणसंयोगाश्रयत्वात् ज्वलद्दहन
वत् पूर्वं के एवं तर्हि नत्र णादीनामूर्ध्वगमनं स्पर्शवद्वेगवद्द्रव्यसंयोगजं अनूर्ध्वगमनशीलस्यत्र्य
त्वात् । परस्परस्पराभिनिर्त्तहं नद्यीपूरवत् अन्यथा निमित्तांतरासंभवे कारणं विना कार्योत्पत्तिप्रसंगः । ऊर्ध्वगमनं वा नयं वायुस्तृ
णादीनामूर्ध्वगम ५२

श्री

५६ त्मोद्यसज्ञावेऊर्ध्वगमनत्वात्।ज्वलत्पावकप्रेरितत्वणायुर्ध्वगमनवदिति।वक्तुर्धियामाह।प्राणेंतःशरीरे।शरीराभ्यंतरचारीवा
युःप्राणइत्युच्यतइत्यर्थः।तत्किंस्थानभेदादेवायंधिषयादिभ्योभिद्यतइत्यतआहारसेति।अशितपीतस्याहारस्यसा
रोधिकारोरसः।मलमूत्रदूषिकापुरीषस्वेदादयोधानवोरुधिरादयःशुक्रांताउपलक्षणंचैतत्।दोषौपित्तकफौउ
दर्यश्चाग्निस्तेषांश्रेनणमितस्ततोनयनं।आदिग्रहणाद्धारसंविकारश्चतेषांहेतुः।एतेनविषयादसाधारणार्थ
भेसार क्रियाभेदोदर्शितः।मूर्तत्वसमानदेशत्वयोर्विरोधभियाशरीरस्थंचवायवइत्यागमप्रसिद्धिमन्यथासमर्थ ५०त
यति।एकःसन्क्रियाभेदादिति।एकएवप्राणःकार्यभेदात्पंचसंज्ञांलभतेनतुसंज्ञाभेदात्संज्ञीभिद्यतइत्य राम
र्थः।मुखनासिकाभ्यांनिष्क्रमणप्रवेशा[illegible]नात्प्राणइति।तेषामेवमलादीनामधोनयनादपानःसमं ४६
नयनात्समानःऊर्ध्वंनयनादुदानः।नाडीमुखेषुवितन[illegible]नाद्व्यानइति।तेपिएवंव्यादयःश

रीरेंद्रियविषयानारभमानाः किमविच्छेदेनारभंते। आहोस्विद्विच्छेदोप्यस्ति। यदापि विच्छेदेनारभंते तदापि किमे
तएव। किंवादृष्टमप्यपेक्षंते। यदाप्यदृष्टमपेक्षंते तदापि किमनधिष्ठिताः किंवा केनाप्यधिष्ठिता इति कात्र विशे
षः। अविच्छेदे तद्वचनादाम्नायप्रामाण्यमिति व्याकुप्येत लोकसंतत्यविच्छेदे वेदसंप्रदायस्याप्यविच्छेदात् विच्छेद
वाद्यव्यवहारव्युत्पत्त्यनुत्पत्तौ सर्वलोकव्यवहारविलोपप्रसंगात् मूलाभावात् तत्र एवेति पक्षे वैचित्र्यानुपपत्तिः ए
षां साधारणत्वात् अदृष्टापेक्षायां सर्ववृत्तिनिरोधे कार्यानुत्पत्तिप्रसंगः अदृष्टानां प्रथमप्रवृत्तिलाभे कारणाभा
त् अनधिष्ठितानामेव प्रवृत्तौ अचेतन्यानुपपत्तिः प्रवृत्तेरनुपपत्तिर्वा अचेतनप्रवृत्तेः पराधिष्ठानकार्यत्वनियमात्
अधिष्ठातृत्वे च नास्मदादीनामुपादानानभिज्ञत्वात् नेतरस्य प्रयोजनाभावादिति समाकुलितांतेवासिनः समाश्वा
सयन्नाह भवतु स्तामिति। सृष्टिसंहारयोर्विसर्गप्रलययो[illegible]र्विधिः प्रकारो ह्येकादिक्रमेण

क्षणद्वयं लवं प्रोक्तो निमेषस्तु लवद्वयं ॥ २

47 सृष्टिः क्रियाविभागादिप्रक्रमेण परमाण्वंतः प्रलय इति कथ्यते सृष्टिसंहारयोरनिर्देशं प्रथममवतां दर्शयितुं सृष्टिक्रम प्रति
मुपक्रम्य संहारक्रमेण व्युत्पादयति ब्राह्मेत्यादि। अष्टादश निमेषास्तु काष्ठास्त्रिंशत्तु ताः कलास्त्रिंशत्कला मुहूर्तः
स्यात्त्रिंशद्रात्र्यहनी च ते। अहोरात्राः पंचदश पक्षो मासस्तु तावुभौ। ऋतुर्मासद्वयं प्रोक्तमयनं च ऋतुत्रयं अयनं द्वितयं व
र्षो मानुषायमुदाहृतः एष दैवस्त्वहोरात्र स्तेः पक्षादिभिः पूर्ववत् देववर्षसहस्राणि द्वादशैव चतुर्युगं। चतुर्युगसहस्रं
तु ब्रह्मणो दिनमुच्यते रात्रिश्च तावती तस्य ताभ्यां पक्षादिकल्पना तथा वर्षशतं तस्यां नैव वर्त्तमानस्य ब्रह्मणो
पवर्गकाले मोक्षकाले असंकल्पितफलकाम्यकर्त्तारः साकारोपसनापरिवासितवंतः सायतयस्ते हिरण्य राम
गर्भपदवीमनुप्राप्यापरज्यंते इत्यागमात् यदा त्वीश्वर एव कार्यवशात् गृहीतदेहो ब्रह्माद्यवस्थामापद्यते ४७
इति पक्षस्तदा ब्रह्मणोऽपवर्गकाले शरीरापवर्जनकाले व्याख्येयं तस्य दुःखात्यंताभावत्वात् नित्यमुक्तत्वादि

सि.धे: ॥ इह संसारे जननमरणप्रबंधघोरांधकारे खिन्नानां नानादुःखैर्निःसहीभूतानां निशी विनिशि प्रलये विश्रामार्थं किंचित्का
लं दुःखोपशमार्थं सकलभुवनपतेः कालाग्निरुद्रादिपरमेश्वरवर्षपर्यंतानां पत्युः स्वामिनो यथेष्टविनियोक्तुरितिया
वत् अत एव परमेश्वरस्य अन्ये ही श्वराः जगदेकदेशतयः इंद्रयमवरुणादयः स पुनः कृत्स्नस्य जगतो महानी
श्वरः तस्य संजिहीर्षा सम कालं संहरणेच्छानंतरकालं यद्यपि भगवत इच्छा नित्या स्तीयि [illegible] व मा कारा एकरूपैव
तथाप्युपाधि भेदात् संजिहीर्षा चिकीर्षेत्येवमादिरुच्यते उत्पत्तिरपि तस्या उपाध्युत्पत्तिरेव स वकाल विशेषा वर्षशतांता
दिशब्दवाच्यः शरीरेंद्रियमहाभूतोपनिबद्धका [illegible] नामुत्पत्तिहेतूनी परमाणुभ्योधिक परिमाणतया उपचाराद्यणुक
मपि महाभूतमुक्तं सर्वात्मगतादृष्टानां सर्वेषामात्मसु समवेतानां सर्गहेतूनामिति शेषः वृत्तिनिरोधे सति प्रलयहे

स्पतिविनाश

१६९न तुर्नोप्रतिबंधे सतिमहेश्वरेछात्माणुसंयोगजकर्मभ्य इतिमहेश्वरेछासहितायेआत्माणुसंयोगास्तेभ्याजातानिकर्माणियानितेभ्यः
शरीरेंद्रियकारणाणुविभागास्तेभ्यस्तत्संयोगनिवृत्तौशरीरेंद्रियमूलपरमाणुसंयोगनिवृत्तौतेषांशरीरेंद्रियाणामापर
48 माण्वंतोविनाशः यद्यपिपरमाण्वंतइतिवक्तुमुचितंतथापितंशब्दस्यावयववचनत्व[illegible]भ्रमनिरासेनपरमाणुना
मवधित्वमाविष्कर्तुमापरमाण्वंतइत्युक्तंतेनेतदुक्तंभवतितावदयंविनाशोयावत्परमाणवोऽवसानभित्तिनत्कय
थादंशांतःपटइतितथातेनैवक्रकारणमहेश्वरेछादिनापृथिव्युदकज्वलनपवनानामपिमहाभूतानामनेनैवक्र
मेणक्रियाविभागादिनाउत्तरस्मिन्नुत्तरस्मिन्सतिपूर्वस्यपूर्वस्यविनाशोजलादौसतिपार्थिवस्यमहाभूतस्य
ज्वलनादौसतिज्वलनस्येत्यादि अयंचक्रमविशेष[illegible]निश्चयआगमादनुसर्तव्यएवमापरमाण्वंतोविनाशइति राम
वचनादेवमरमाणूनामवस्थानेप्रतिपादितेसांख्यादिमतनिरासायपुनस्तदवस्थानमाहातत्तइतितदेस्यर्थः ४८

विभक्ताः कार्यद्रव्यरहिताः अवयवाख्यसंयोगरहिताश्चेत्यर्थः। तत्किमेत एवावतिष्ठंते नेत्युच्यते। किंतर्हि धर्मश्च अधर्म
श्च भावनाख्यश्च संस्कारस्तैरनुविद्धा आत्मानः उपलक्षणमेतत्। अन्योपि नित्यवर्गः। अनित्येष्वपि पाकजा
दयो गुणाः कालावच्छेदोपाधितया वर्त्तमाना निमहाभूतसंक्षोभप्रभववेगजानि कर्माणि संतन्यमानान्य नुष ४
वतिष्ठते। अन्यथा कालावच्छेदानुपपत्तेः पुनः सर्गापत्तेः। तदिदमुक्तं नावंतमेव कालमिति। ब्राह्मेण मानेन
वर्षशतांतं यावदित्यर्थः। ततस्तदनंतरं पुनरित्यभ्यासमाह तेन सर्गप्रलययोरनादितामभिव्यनक्ति। अथ
किमर्थं भगवान् पुनः स्रक्ष्यतीत्यत आह प्राणिनां भोगभूतय इति। प्राणसंबंधयोग्यानां संसारिणामिति
यावत्। भोगस्य च समवेतसाक्षात्सुखदुःखानुभवस्य निष्पत्तये। महेश्वरस्य सिसृक्षायाः सर्जने छाया
अनंतरं सर्वेष्वात्मसु संसारिषु गताश्चेते वृत्तिलब्धावसरतया चये ये दृष्टास्तदपेक्षेभ्यस्तत्संयोगेभ्य

४०
५१

आत्मपरमाणुसंयोगेभ्य एव परमाणुषु कर्मोत्पत्तौ सत्यां तेषां परमाणूनां परस्परसंयोगेभ्यो द्व्यणुकमादिर्यस्यत्र
क्रमस्य तेन महान्वायुः समुत्पन्नो नभस्याकाशे दोधूयमानो भृशं कंपमानो द्रव्यांतरानुत्पत्तेरप्रतिहतवेगत्वा
त्पवनजातिनियतत्वात्तिर्यग्गमनस्वभावत्वमस्य। तदनंतरं पवनोत्पत्तेरनंतरं तस्मिन्नेव पवने स्पर्शवे
ता॰भत गवत्तया गुरुत्वप्रतिबंधकौ दाधारे इत्यर्थः। आप्येभ्यः परमाणुभ्यस्तेनैव द्व्यणुकादिक्रमेण महान् सलिलनि
धिरुत्पन्नो भृशं प्लवमानस्तिष्ठति वायुवेगात्। तदनंतरं सलिलनिधेरुत्पत्त्यनंतरं तस्मिन्नेव महोदधौ पा
र्थिवेभ्यः परमाणुभ्यस्तेनैव द्व्यणुकादिक्रमेण समुत्पन्ना पृथिवी महती प्राथस्यात् संपूर्णतया संहता
निवाडावयवा अविशीर्णतया। तदनंतरं पृथिव्युत्पत्त्यनंतरं तैजसेभ्यः परमाणुभ्यः आनभिभवादतिशये राम
न देदीप्यमानं एवमनेन क्रमेणाभिध्यानं संकल्पस्तन्मात्रान्नतु कुलालादिवत् कायव्यापारादित्यर्थः। ते ४९
तेनैव द्व्यणुकादिक्रमेण महातेजोराशिसमुत्पन्नआस इति २

ज्रसानां परमाणूनां पार्थिवाणुसाहितैस्तेनां डस्य हिरण्मयत्वं विवक्षितं। तस्मिन्नंडे चत्वारि वदनानि कमलान्नि यस्य
तं सर्वेषामपि तामहं शरीरिणामाद्यं ब्रह्माणं सकलभुवनसहितं सर्वैरधस्तनैः सुतलादिभिरुपरितनैर्भू
र्भुवरादिभिर्लोकैः सहितमुत्पाद्य प्रजासर्गे नियुंक्ते त्वमेवं कुर्विति सर्वेति च शब्दः समुच्चये यद्धि कार्ये केषुका
र्येषु महेश्वरस्यापि कर्तृत्वात्। न च महेश्वरे कर्तरि किं ब्रह्मणेति वाच्यं। शरीरान्वयव्यतिरेकानुविधायि
कार्यत्वस्याप्युपलभ्यमानत्वात्। अतिशयेन ज्ञानवैराग्यैश्वर्यैः संपन्नः। यद्यज्ञः स्यात्त्रितयसंपन्नस्ततः
प्राणिनां यानि कर्माणि तेषां विविधं पाकं विदित्वा स्वसुतानिति प्रत्येकमभिसंबध्यते। मानसानिति वायो
निज्ञान् प्रजापतीन् दक्षादीन् मनून् स्वायंभुवप्रभृतीन् देवानादित्यादीन् ऋषीन् गौतमभरद्वाजा
दीन् पितॄन् कव्यवाहनादीन् गणान् कुष्मांडकादीन् गणशब्दः प्रत्येकं चाभिसंबध्यते। तत्र प्रजाप
४ समर्थोपि न कुर्यात् यदि विरागी न भवेत् न कर्माण्यनुरुध्यात्। तथा च प्राणिनां कृतहानमकृताभ्यागमश्च स्यात्। यद्यनीश्वरो भवेत् जानतोप्य ४
स्यापेक्षितं न सिद्ध्येत् य... तः ४४

तयस्तत्रतिनियतप्रजास्रष्टारः। मनवोराजधर्मप्रवर्त्तयितारः। देवाहविर्भोक्तारः। ऋषयःप्रथमवेदाध्येतारः। स्वधाकारि
50 णः। गणाबलिभागिनः। मुखेति। मुखात् ब्राह्मणं। बाहुभ्यांराजन्यं। ऊरुभ्यांवैश्यं। पद्भ्यांशूद्रं। अन्यान्यपितिर्यग्विप्रभृती
न्युच्चैर्वान्युत्कृष्टापकृष्टानि। आशयानुरूपेति। फलज्ञानपर्यंतमाशेरतइत्याशयः। कर्मज्ञानवासनास्तदनुरू
पैस्तैस्तैर्धर्मज्ञानवैराग्यैश्वर्यैरित्युपलक्षणं। अधर्माज्ञानानैश्वर्यैश्च। तत्फलैश्चसुखादिभिश्चसम्यग्यो
जयति। यदात्वीश्वरएवकार्यवशात्ब्रह्मादिशरीरमुपादत्तेइतिपक्षस्तदानियोगःकायवाङ्मनोव्यापारस्तद्धये
तत्प्रेरणंप्रयत्नवदात्मसंयोगलक्षणं। मुखत्वादिनाब्राह्मणत्वाद्यभिव्यंजकव्यक्तिविशेषनिमित्तेनतुतद्दृष्टापनि
बद्धभूतभेदप्रतिपादनंतद्देवमियताप्रबंधेनप्रत्ययविशिष्टेनावदृष्टापक्षेःपरार्थप्रवृत्तेनपरमेश्वरेणाधिष्ठितैःपृथिव्या राम
दिभिर्विश्वमारभ्यतइतिवहृतास्सर्वेपूर्वाक्षेपाःपरिहृताबोद्धव्याः। तथाहि। विछेदेनद्ववनादाम्नायप्रामाण्य ५०

मप्रत्यूहमूहेतमानसमन्वादिसृष्ट्यावाआद्यव्यवहारमुपपादयेत् अत्र दृष्टोपेक्षयावैविध्यंसमर्थयेत्। परार्थप्रवृत्त्या
वनिःप्रयोजनत्वमनुसारयेत् परमेश्वराधिष्ठानेनचअत्रचैतन्यप्रवृत्तिनियमोसमञ्जसयेदिति॥ राम॥ स्यादेतत्।
सर्वमिदमीश्वरसद्भावसिद्धौसंभवेत् नत्वसिद्धावेवंकिंप्रमाणमितिचेत्। तद्धेतुत्वेपिकिंचिदुच्यते शारीरानपेक्षो
त्पत्तिकंबुद्धिमत्पूर्वकंकारणवत्त्वात् यत्कारणवत् तद्बुद्धिमत्पूर्वकंयथारथः तथाचैतत्तस्माद्बुद्धिमत्पूर्व
ल ५ कमिति। अनुपलब्धपूर्वकोटिषुपर्वतादिषुकारणवत्त्वस्याप्रतीतेर्भागासिद्धमितिचेत्। न। अद्यत्वेषुसावयवत्वेन
तदनुगुणेषुकार्यगुणत्वेनकर्मसुकर्मत्वेनैवतदनुमानात्। कारणवत्त्वस्यासर्वज्ञपूर्वकत्वेनसहदृष्टान्तेघटा
दौदर्शनात् तद्विपरीतस्यचपक्षेविवक्षितत्वात् विरुद्धमिदमितिचेन्न। सान्वयमात्रेणाविरोधात्। कार्यत्वेनानित्य
त्वानुमानेनरूपसाहचर्यवदरूपस्याप्यविनाभावाभ्युपगमेत्वसर्वज्ञ कर्तृपूर्वकत्वमुपस्थाप

5|

यत्तिहेतौकस्तद्विपरीतमभिप्रेयाद्यतोविरोधोचोद्येत। असर्वज्ञस्यशरीरिणः प्रमाणनिरस्तत्वात्त्वमेवतद्विपरीतम
भिप्रैषीतिचेत्। नन्वेवमसर्वज्ञेन शरीरिणोहेतोरव्यापनात्कुतस्तद्विपरीतेनविरोधः तथाविधस्यानुपलब्धेरितिचे
त्। नास्तुतरांतर्हिविरोधसिद्धेरसंभवः। सात्त्यधेनरूपस्यद्वयोरिवपरस्परधर्मिणिपरिहारेणाप्रतीतेः। प्र
तीतोवाएकत्रधर्मिणिसहोपलंभेनविरोधस्यबाधितत्वात्। दर्शनस्पर्शनाभ्यांवावायावनुपलंभेमेऽपि रि
व्यादौरूपसहचरस्यदोवत्। स्यादेतत्। नहेतुसाध्ययोर्विरोधंविशेषविरोधमात्रंब्रूमहे। किन्तुव्याप्तिप
क्षधर्मताभ्यामानीयमानयोर्विशेषयोरेवविरोधं। तथाहि। व्याप्तिस्तावद्दर्शनबलादवगतायथादृष्टंविशेषमुपस्थापय
तिनालौकिकमशरीरित्वादि पक्षधर्मतावच्छरीरिणःकिंचिज्ज्ञेनानित्यज्ञानादिमतानोपपद्यतेइतितद्विपरीत राम
मुपस्थापयतित्वानयोर्विरोधेकिंविच्छिध्यतिसायंविशेषविरोधइतिचेत् तदपिनास्तिस्वरूपेणानयोरविरोधात् ५१

परस्परानपेक्षाभ्यां विशेषाऽनुपस्थानात् न हि यो धूमवान् स वह्निमान् इति केवलया व्याप्त्या किंचिदुपनीयते तथा सति
पक्षधर्मतावैयर्थ्यात् नापि यं धूमवान् इत्य न या पक्षधर्मतया नियमानपेक्षया किंचिदुपस्थाप्यते। तथा च सति
व्याप्तिवैयर्थ्यात्॥ तथा च निरपेक्षदशायां विशेषानुपस्थानादेव विरोधासिद्धिः सापेक्षदशायां सहोपलंभात् ३ अपापेक्षसामर्थ्यमसर्पफि त्वात्
न वैविरोधः ननु लौकिकं विशेषमुपस्थापयति पक्षधर्मता न च लौकिकं व्याप्त्याऽनुस्मारितम् असौ सह तद् इति
ब्रूमः ततः किं सन् न सिध्येद् इति चेत् को नु तं साधयितुमुद्यतः अनेनैव विरोधेनान्यापि न सिध्येद् इति चेत् तदि-
दमायातं द्व्यणुकगतं कार्यत्वं कार्यसामवायिकारणं न सह तद् इति अकार्यमपि न भविष्यतीति॥ स्यादेतत्। साध्यां-
शयोरेव विशेषयोर्विरोधं विशेषविरोधमाचक्ष्महे तथाहि। नित्यत्वमाकाशादौ ज्ञानत्वपरिहारेण सिद्धं ज्ञा-
नत्वं च नित्यत्वपरिहारेणास्मदादिज्ञाने तथा कर्तुः शरीरित्वं कुविंदादेरशरीरस्याकर्तृत्वं मुक्तस्य अणुकादे

स्तदनयोर्ज्ञानत्वनित्यत्वयोः कर्तृचातशरीरित्वयोश्चैकत्र धर्मिणि संसर्गो विरुध्यत इति चेदेतदपि नाक्षोपसंहा
रस्थानकस्यैकस्य धर्मिणोऽप्रतीतेः न ह्युष्णत्वशीतत्वे पयःपाकयोरेव विरुद्धे किंतु पयसि तेजसि स्पर्शे व्यां वा
52 यो वा एकत्रोपसंह्रियमाणे तदेतेऽपि नित्यत्वज्ञाने धर्मिभेदेनाविरुद्धे अपि यद्यस्मदादिबुद्धौ गगने
चोपसंहाराद्विरुद्धे इति विवक्षितमायुष्मता अज्ञशरीरित्वकर्तृत्वे वास्मदादौ कुलालादौ वा उपसंहाराद्विरुद्धे इ २१५
त्यभिमतं विरञ्चौ विनोननः किंचिदनिष्टमापद्यते न हि नित्यत्वमज्जत्वेन भसिघटादौ वा विरुद्धे इति परमाणुसा राम
न धनस्य किंचिदपहीयते अथैश्वरात्मनि तज्ज्ञाने चोपसंहारादनयोर्विरोधोऽभिधातुमभिलषितः स न हि नित्य ५१
योः २ त्वमज्जत्वं परमाणाविव धर्मिग्राहकप्रमाणेनैव बाधितमिति बुध्यस्व तिनास्ति विरोधगंधोऽपि विशेषविरोधो
दाहरणं तु वेदनदहनवानयं असुरभिधूमवत्त्वादित्यादि द्रष्टव्यं॥ स्यादेतत् । व्यापकानुपलब्धिबाध

एवंविशेषविरोध इत्युच्यते। तथा हि। कर्तृव्यापकं शरीरादि ततो व्यावर्तमानं कर्तारमपि व्यावर्तयति तृणादिविका
रकारित्वेन हिमस्य वह्निमत्त्वे साध्ये तद्व्यापकमौष्ण्यमिव व्यावर्तमानमग्निमिति चेत् नैतदपि साधीयः। क
स्य हि किमत्र व्यापकं किं कर्तुः शरीरित्वादिकं आहोस्वित्कार्यत्वस्य शरीरादिमत्कर्तृपूर्वकत्वं। प्रथमे ने
श्वरः कर्ता शरीरादिरहितत्वात् क्षितिप्रमाणार्थः स्यात्। तथा चाश्रयासिद्धिः। धर्मिग्राहकप्रमाणबाधो वा।
सावयवाः परमाणवो मूर्तत्वात् क्षितिवत्। द्वितीयस्तु नियमः प्रत्यग्रजायमानांकुरादावेव शरीरिष्टत्वं क
र्तुरनुपलंभेन निरस्तः। दृष्टांतस्तु सर्वथानुपपन्नः। तृणादिविकारो हि यदि रूपादिपरावृत्तिमात्रं हेतुः स
नूनमौष्ण्यापेक्षेण तेजसा कर्तव्यः। नादृशो वपाके निमित्तं हि मम भित्तिं किंचिदनिष्टमापद्यते। न हि सौर
स्य तेजसस्त्रैलोक्यपाकहेतोर्हिमादपगमः क्रियते। अथ विकारो भस्मादिरूपो विवक्षितः सोऽसिद्ध एव। हि

53

महत्तेषु तृणादिषु वा विरोधो बाधो वा। अथ रूपादिपरावृत्तिमात्रेणैवाग्निः साध्यते तदशक्यं। तस्य दर्शनस्पर्शनग्रा
ह्यस्य योग्यानुपलंभबाधितत्वात्। अतादृशस्य तेजोमात्रस्य निवृत्तेरशक्यत्वादनिष्टत्वाच्च। तस्माद्व्यापकानुप
लब्ध्यानुमानं बाधितमिति रिक्तं वचः। सत्प्रतिपक्षत्वं कथंचित्स्यात्। अग्निमद्धिमं तृणादिविकारहेतुत्वात् निरग्नि
कं हिमं तथाविधोष्ण्यरहितत्वादिति। प्रस्तुतं हि तद्देवं प्रकृते। शरीरानपेक्षोत्पत्तिकमकर्तृ एवैकं शरीरानपे चा५
क्षोत्पत्तिकत्वात् गगनवदिति। नेतदेवं शरीरानपेक्षोत्पत्तेरसाधारणत्वात् सकर्तृकात् घटादेरिवाकर्तृकाद्ग राम
गनादेरपि व्यावृत्तत्वात्। उत्पत्तिव्यावृत्तिमात्रस्य वासिद्धेः। शरीरादनुत्पत्तेश्चासमर्थविशेषणत्वात्। सपक्षे ग ५३
गनादावनुत्पत्तिमात्रस्यैव व्याप्यत्वनिश्चयात्। निश्चितव्याप्तेश्च पक्षोपनयात्। अन्यथातिप्रसंगात्। स्यादेत
त्। यथा ज्ञानस्य नित्यत्वे शरीरापेक्षा नास्ति ज्ञानगतकार्यत्वप्रयुक्तत्वाच्छरीरसंबंधस्येति तत्कार्यपरिशुद्धि
१ स्यात् तथा प्रयत्नस्यापि नित्यत्वे ज्ञानापेक्षापि न स्यात् प्रयत्नगतकार्यत्वप्रयुक्तत्वात् ज्ञानसंबंधस्य १

रस्तु दूषणमिति चेत्। एतदप्यसारं। ईश्वरमधिकृत्य तर्काणामाश्रयासिद्ध्यासिद्धिभ्यामनवसरदुस्थत्वात्। यदी
श्वरः कर्त्ता स्यात् शरीरी स्यात्। अनित्यज्ञानवांश्च भवेत्। यदीश्वरस्य प्रयत्नः स्यादनित्यः स्यात्। यदीश्वरस्य प्रयत्नो
नित्यः स्यात् ज्ञानानपेक्षः स्यात्। यदीश्वरस्य बुद्धिः स्यात् सर्वविषया भवेत् इत्यादयो हि ते। क्षित्यादिकम
धिकृत्य विपर्ययापर्यवसानात्। यदि विवादाध्यासितं बुद्धिमद्धेतुकं न भविष्यत् अनित्यहेतुकमापत्स्य प्रयत्न
त्। शरीरजन्यं वा भविष्यत् असर्वज्ञकार्यं वेत्यादयो हि ते। तद्विपर्ययश्चासमर्थविशेषणत्वेन प्राग
व निरस्तः। न च प्रयत्नेन बुद्धिः साध्यते बुद्ध्या वा प्रयत्नः। इतरव्यावृत्त्या वान्यतरव्यावृत्तिः। येनैतत्सं
बंधोपाधिकत्वं वोद्यमवकाशमासादयेत्। किंतु धूमवत्त्वेनार्द्रेंधनप्रभवदहनत्वमिव कार्यत्वेन
परिदृष्टसामर्थ्यकारकचक्रप्रयोज्यत्वं तावत्साध्यं तत्र यो ज्ञानप्रयत्नयोर्दहनार्द्रेंधनयो

श्विस्योपाधेरपि संबंधो न हेतुं दूषयति। तस्य साध्यसंबंधे निरुपाधिकत्वादिति॥ ननु कारणविशेषादवश्यं का
र्यविशेषेण भवितव्यं। अस्ति च केषुचिच्छरीरं कारणं ततो विशेषः स्यादवश्यं चैतदभ्युपगंतव्यं। अन्यथा श
रीरिकर्तृकत्वानुमानं [illegible] नस्यात्। सवि विशेषाय दृष्टे न क्रियादर्शिनोपि कृतबुद्धिरुत्पद्यते। तदित्यादूरव
प्रकर्षेणोच्यते। ततः स एव कर्त्तारं प्रयोजयति। यो कोसामान्यं तु तत्प्रयुक्तां व्याप्तिमुपजीवतीति। न। विशेषस्य
विशेषं प्रत्येव प्रयोजकत्वे सामान्यं प्रत्यनुपाधित्वात्। अन्यथा घटादिष्वावांतरभेदेषु सत्स्वपि दृष्टेरि
त्युपलक्षिता विशेषस्तेन प्रयुक्तां व्याप्तिमुपजीवतीत्यप्रयोजकं स्यादिति यत्किंचिदेतत्॥ तर्कस्तु यदि का राम
र्यं कार्त्तारमतिपतेत् कारणांतरमप्यतिक्रामेत्। तथा च कार्यत्वमेव हीयेतेति संक्षेपः। विस्तरस्तु न्याय ५८
कुसुमांजलावात्मतत्वविवेके चाध्यवसेयइति। अस्तु तावदेवं विशेषस्य तु कुतः सिद्धिः। यथा हि द्व्य

प्रतीतेनविरोधादिप्रसंगेन्तुमशक्यं।तथातस्यसाधनमप्यशक्यं।नह्यरूपंहिकश्चित्किंचिद्विधीयतइति
चेत्।न।साधनसामान्यसंबंधबलेनसाध्यसामान्यविधानादुपक्रांतेतत्सहकारिपक्षधर्मताबलेना
प्रतीतविशेषपर्यवसानात्।सामान्यसंगतिबलेनप्रवृत्तानांपदानामाकांक्षादिसहकारिवशाल्लौकिक
इववाक्यार्थेःइतिप्रमाणस्तत्रं।अन्यथानकश्चित्किंचिदप्यप्रतीतंप्रतीयेतेति॥अत्रकश्चिदाह॥
एतंतर्हिकेवलव्यतिरेकिणा॥अन्वयिनश्चवाष्टद्वव्यतिरेकादेरप्रसिद्धेः।तदसत्॥आकांक्षा
नुपपत्तिभ्यांविशेषोपस्थापनात्।शाब्दोह्यर्थोयावताविनानान्वयमुपैति।तावंतमनालंब्यप्रतीते
रपर्यवसानंमाकांक्षेत्युच्यते।तावानवधिरन्वयिनस्तत्प्रतीतौपर्यवसितायांकश्चिद्विशेषेप्रमाणं

55

न्तरबाधेनानुपपत्तिः। तावतीसीमाव्यतिरेकिणः तदत्र नगादिद्व्यणुकपर्यंतपक्षीकरणेन तत्कारणपरमाण्वा
दिविषयज्ञानं यदि न स्यात्। कः शब्दार्थो नगसागरादिसकर्तृकमिति। परिदृष्टसामर्थ्यकार[illegible]कत्वकत्रप्रयोक्तुः क
र्तृशब्दवाच्यत्वात्। एवं सर्गादिकार्यपक्षीकरणेन तत्काले न यदि शरीराद्यनपेक्षं ज्ञानं स्यात्। कोर्थः सर्गा
दिकार्यं बुद्धिमत्पूर्वकमिति। सर्गसंनिहितो हि शरीरेंद्रियविषयग्रामविरहोपलक्षितः कालः सर्गादि
रित्युच्यते। तस्माद्विशेषाप्रतीत्या सामान्यप्रतीत्यपर्यवसानादिह पक्षधर्मतासहायात् कार्यत्वादे राम
व नित्यसर्वज्ञकर्तृसिद्धिः। इच्छादयः क्वचिदाश्रिताः कार्यत्वाद्गुणत्वाद्रूपवच्च त्वष्टद्रव्यातिरिक्तद्र ५५
व्यपारतंत्र्यमप्रतीत्य शब्दार्थो न प्रतीयत इति नास्ति। नह्याश्रयादिशब्दाक्षित्यादिव्य[illegible]तिरिक्ताश्रयाः
क्षित्यादिविरुद्धार्थो वाच्येन तत्प्रतिपक्षे नियमेनेच्छादिपदार्थानामन्वयः प्रमाणांतरबाधपर्यालो

त्वनादनुपपत्तिरिति अन्यदेतदिति ॥ मम ॥ आकाशनिरूपणप्रसंगेन कालदिशोरुपन्यासः ॥ ॥ आकाश

कालदिशामिति । पारिभाषिक्यो निमित्तमन्तरेणाङ्गीकृत्य याहिकतयाऽस्याः संज्ञा भवंति । आकाशं

कालो दिगिति । कुतो हेतोरित्यत आह ॥ अपरजात्यभावे सतीति । अपरजातीनामाकाशत्वादीना

मभावादित्यर्थः । तदेव कुत इत्यत आह । एकैकत्वात् व्यक्तिभेदाभावात् नित्यमेकमनेकवृत्ति सा

मान्यमिति लक्षणव्याघातेन स्वरूपव्याघातप्रसंगादिति भावः तथापि पारिभाषिकत्वमनुपपन्न

मतीन्द्रियत्वेन स्वरूपनिर्देशानुपपत्तेः यः शब्दाश्रयः तदाकाशमित्येवं तु शब्दाश्रयत्वमेवोपाधिः

स्यात् । न । शब्दाश्रयत्वस्यापलक्षणतया तटस्थत्वात् । अयमसौ देवदत्त इत्यत्र वेदनावत् । अन्य

56 थाशब्दगुणमाकाशमिति सहप्रयोगो न स्यात्। यद्येवमाकाशादिशब्देभ्यः परस्य त्वतलादेर्निरर्थकत्वमापद्यत इ
ति चेन्न। आकाशस्य स्वरूपमिति वदौपचारिकत्वात्। व्यावृत्तिपरत्वाच्चेति। तस्य द्रव्यत्वव्यवच्छित्तये स्व
रूपस्थितये च गुणनाह। तचेति। तेषामाकाशकालदिक्षु मध्ये आकाशस्य शब्देन स्वरूपसंख्यादिना द्रव्य
त्वं व्यवस्थाप्यते। अरूपतया चक्षुषः तत्राप्रवृत्तेः तस्य रूपयोग्यतामुपादायैव ग्राहकत्वात्। अन्यथाऽ
त्मनोऽपि चाक्षुषत्वप्रसंगात्। कथं तर्हि इह पक्षी नेह पक्षीति प्रत्यय इति चेत्। आलोकमंडमाश्रित्येति
ब्रूमः तथापि इहालोको नेहालोक इति कथमिति चेत्। न द्रव्यवानाश्रित्येति यत्किंचिदेतत्। कथं पुनः राम
शब्दस्वरूपं व्यवस्थापक इत्यत आह। शब्द इति। शब्दो न स्पर्शवद्विशेषगुणः प्रत्यक्षत्वे सति अकारण ५६
गुणपूर्वकत्वात्। योऽपि हि स्पर्शवतां विशेषगुणं शब्दं इच्छति सोऽपि स्थूलवीणाद्याश्च। यमिच्छेत् न तु पर

म २

माएवाद्याश्रयं प्रत्यक्षत्वप्रसंगात् । परमाणु गुणानामतींद्रियत्वात् । नथावरूपाश्रयस्य सामान्यवतः कार्यत्वेन
सामान्यादित्रयव्यवछेदे स्पर्शरहितत यावकार्यद्रव्यत्वव्याप्तत्वौ प्रतिनियतेंद्रियग्राह्यत यावकर्मत्वानुपपत्तौ
विशेषगुणत्वं उभयवादिसिद्धं । स्पर्शवद्द्रव्यैः प्रतिशब्दस्य तत्प्रतिषेधः प्रतिज्ञायते न स्पर्शवद्विशेषगुण इति । अत्र
हेतुरकारणगुणपूर्वकत्वादिति । स्पर्शवतां शंखादीनां यानि समवायिकारणानि तेषां गुणास्तदनपेक्षत्वा
त् । ये पुनः स्पर्शवद्विशेषगुणाः न ते तदनपेक्षा यथा रूपादय इति केवलव्यतिरेकी । अत्र च पिठरपाकानभ्यु
पगमात् तद्विशेषगुणे विरोधः । परमाणुगुणेष्वस्तु स्यात् । तन्निषेधार्थमाह । प्रत्यक्षत्वे सतीति । हेत्वंतरमाह
यावद्द्रव्यभावित्वादिति । स ह्येवंवं शशांखादिषु तन्निवर्तते । ये पुनः तेषां विशेषगुणाः न तेषु स त्वनुनिवर्तते ।
यथा रूपादयः । अत्रापि पूर्ववत्प्रत्यक्षत्वे सतीत्यनुषंजनीयं । अन्यथा परमाणुगुणैरेव विरोधः स्यात् । सुखादीनामा

57

त्मगुणत्वसिद्धावन्वयोपि द्रष्टव्यः। अनयोस्तर्कं सूचयति। आश्रयादन्यत्रोपलब्धेरिति। आश्रयाभिमताच्छंखादे
रन्यत्र कर्णदेशः कुल्यवच्छिन्ने नभस्युपलब्धेः। यदि शंखाद्याश्रयः शब्दः स्यात् तदा नोपलभ्येत। कर्णविव
रपिधान इव सर्वदैवाप्राप्तेः अप्राप्तस्य च ग्रहणे सर्वत्र सर्वदैव सर्वैः सर्वशब्दोपलंभप्रसंगः। न च
शंखश्रवसोः प्राप्तिरस्ति। न वाश्रयानपेक्षा एव गुणाः परेण प्राप्यंते तस्माच्छंखादिनिमित्तमपहाय राम
द्रव्यांतरे वर्त्तमानो वीचीतरंगन्यायेन कर्णदेशः कुल्यवच्छिन्नमाकाशादिदेशं प्रत्यासन्न उपल ५७
चा॰२ भ्यते। अन्यथा त्वनुपलब्धिप्रसंगः। ननु युगुणो भविष्यति। अन्यथा भेर्यादिषु ताडितेषु यावद्वेगम पि॰हि॰२
भिप्रतिष्ठमानः पवनो निमित्तीभवतीत्यभ्युपगमः वदंति च केचित् वायुरापद्यते शब्दतामिति। नात्रो

त्रस्य प्रतिनियतार्थग्राहकत्वेन बहिरिंद्रियत्वात्। बहिरिंद्रियस्य च ग्राह्यजातीयविशेषगुणवत्त्वनियमात् अन्य
था सर्वस्य सर्वार्थत्वेनांधबधिराद्यभावप्रसंगः एकस्य सर्वार्थत्वेन तद्धारत्तौ गुणांतरानुपलंभप्रसंगा
त्। तथा च शब्दस्य वायवीयत्वे श्रोत्रस्यापि वायवीयत्वप्रसंगः ततः किमिति चेत्। एकस्य स्पर्शशब्द
[illegible] ग्राहकत्वे अनेकार्थतया बाह्यत्वव्याघातः बाह्यत्वे च अनेकार्थत्वानुपपत्तिः वायवीत्वा
विशेषेपि त्वक्श्रोत्रयोर्व्यक्तिभेदात् प्रतिनियतार्थत्वाविरोध इति चेत्। न। प्रतिशरीरं घ्राणादीनां
व्यक्तिभेदेपि विषयवैचित्र्यादर्शनात्। अदृष्टवैचित्र्यादेवमपि स्यात् को विरोध इति चेत्। तर्हि पार्थि
वैकप्रकृतीनामेवादृष्टवैचित्र्यादुत्पादवैचित्र्यं विषयव्यवस्थायेभविष्यति। कृतं रसनादीनाम्

र्संतरकल्पनयाबाह्यानुसारेण तत्रतत्रैवेतिवेत्।सममः समाधिः।तस्मा)द्यथोक्तहेतुभ्यां शब्दो नस्पर्शवद्वि
शेषगुणः।आत्मनोभविष्यतीत्यतआह।नात्मगुणः कुत इत्यतआह।बाह्येंद्रियप्रत्यक्षत्वात्।मन
58 सोऽन्यदिंद्रियं बाह्येंद्रियं तत्प्रत्यक्षत्वात्।गंधवदित्यन्वयी।बाह्येंद्रियत्वं च श्रोत्रस्य प्रतिनियतविषय
त्वाच्चक्षुर्वत्।आत्मगुणानांबाह्येंद्रियेणग्रहीतुमयोग्यत्वात्।अन्यथाबुद्ध्यादीनामपितथात्वप्रसंगा
त्।हेत्वंतरमाह।आत्मांतरग्राह्यत्वादिति।यत्रस्थशब्दस्ततोऽन्य आत्मा आत्मांतरं तद्ग्राह्यत्वादि राम
त्यर्थः।वीणाद्याश्रयोहिशब्दः प्रतीयते।नसंतानद्वारेण श्रोत्रस्थएवातस्मादन्यश्चास्यग्राहकः।येत्वा ५८
त्मगुणाग्रह्यंते तेनग्राहकस्थाएवग्रह्यंते।यथासुखादयः ग्रह्यमाणस्तु शब्दो नग्राहक

स्फुट इति। तदेव कुत इति चेदत आह। आत्मसमवायात् ग्राहकासमवायात् इदं प्रसिद्धमेत्यत आह। अहंका
रेणेति। विभक्तस्य व्यधिकरणस्य ग्रहणात् वीणा वाद्यते वेणुः पूर्यते न त्वहं [illegible] वाद्ये पूर्ये वेति कस्यै प्रत्ययः। धित
अहंकारेण व्यधिकरणस्यात्मसमवायिगंधादीनामपि तथात्वप्रसंगः। अन्ये त्वात्मांतरग्राह्यत्वादि
ति अनेकप्रतिपत्तृसाधारणत्वादिति हेत्वर्थं वर्णयंति। स तु संदिग्धासिद्धः। संतानानुमानेन मूलप्रत्यभि
ज्ञानान्नैष दोष इति चेत्। नहि सुखादीनामनुमानेनानेकप्रतिपत्तृसाधारणप्रत्यभिज्ञानविषयत्वा
दनैकांतिको हेतुः स्यात्। आत्मसमवेतस्यैव वीचीतरंगन्यायेन मूलप्रत्यभिज्ञोत्पन्नो विपक्षे
बाधकाभावाच्च। तस्माद्यथाव्याख्यातमेवास्तु। नदिक्कालमनसां विशेषगुण इति शेषः। अत्र
हेतुः श्रोत्रग्राह्यत्वादिति। अत्र श्रोत्रेति स्वरूपकथनमात्रं ग्राह्यत्वात्प्रत्यक्षत्वादित्येव हेतुः॥

गंधादिवदिति आत्मगुणत्वे शब्दस्य मनसः श्रोत्रस्य सांकर्यप्रसंगः दिक्कालमनोगुणत्वे च शब्दस्य विशेषगुणत्व
व्याघातः हेत्वंतरमाह । विशेषगुणाभावाच्चेति । न दिक्कालमनसामिति । वाक्यशेषः । अयोगस्त्वयं शब्दो न दिक्का
59 लमनसां गुणः विशेषगुणत्वात् गंधवदिति । तद्गुणत्वे शब्दस्य तेषां तत्त्वव्याघातः धर्मिग्राहकेन प्रमाणे
न तेषां विशेषगुणशून्यतेक्षेपादिति । ननु यदि नाम शब्दः पृथिव्यादीनां अष्टानां गुणो न भवति । मा भूद्दा
काशं तु नवमममस्तीति किं प्रमाणं अत आह । पारिशेष्याद्गुणो भूत्वा आकाशस्याधिगमे लिंगमिति ।।
अयमर्थः शब्दस्तावद्द्रव्याश्रितो गुणत्वाद्रूपवदिति सामान्यतो द्रव्यसिद्धौ शब्दाश्रयत्वेनाकाशसंज्ञा राम
यां विनिवेशितायां तदाकाशं पृथिव्यादिभ्यो व्यावर्त्तते शब्दाश्रयत्वात् यः पुनः पृथिव्यादिभ्यो न भिद्यते नासौ ५९

शब्दाश्रयो यथा पृथिव्यादय एव ॥ न वायं शब्दाश्रयः तस्मादितरेभ्योऽभिद्यते यथा शंखादिषु शब्दो न समवै
ति। तथोक्तमधस्तादिति निरवद्यं। सोयं परिशेषाद्व्यतिरेकः। तदिदमुक्तं गुणो भूत्वेति। एवं आकाशस्य स्व
रूपसिद्धे शब्दगुणत्वेन च गुणांतराण्यस्येदाह। शब्दलिंगाविशेषादिति। यद्यपि द्रव्यत्वादेव सामान्यतः
संख्यायां सिद्धायामेकत्वमपि सिद्धं। न ह्येकत्वमंतरेण समवायिकारणं निरपेक्षं द्वित्वादिकम
पि सिद्ध्यति। भवितव्यं च तत्र द्वित्वादिना पृथिव्यादीनां नवानां पंचानां त्रयाणामित्यादेर्व्यवहारस्य बा हा ४
धकं विना संख्यानिमित्तकत्वात्। अन्यथा पृथिव्यादिष्वपि सा न स्यात्। तथापि शब्दाश्रयस्य द्रव्यस्या
नेकत्वव्यवच्छेदेन नियतमेकत्वं साधयितुं अयमारंभः। तच्च वैभवे सति शब्दलिंगमविशिष्टं स सा
धयति सर्वेषामेव शब्दानां तदेकाश्रयतयैवोपपत्तौ आश्रयांतरकल्पनायां कल्पनागौरवप्रसंगा

त्वादिति। तदणुविधानाद्यत्नो। एतदपि पूर्वोक्तद्रव्यत्वेन सामान्यतः परिमाण ४९

त्। श्रोत्रव्यवस्थाप्यदृष्टव्यवस्थयोपपद्यत इति वक्ष्यमाणोऽसिद्धोऽसत्यामाह। विभववचनादिति। विभवान्महाका

60 शस्तथा चात्मेति सूत्रकारवचनात्। विभवो विभुत्वं सर्वैर्मूर्त्तिमद्भिः सह संयोगः। तस्मात्परमहत्परिमाणं।

अपरिमितस्य सर्वसंयोगानुपपत्तेः। परममहदिति भावप्रधानो निर्देशः। अथवा परममहतो द्रव्यस्य

परिमाणं परममहत्परिमाणमिति षष्ठीसमासः। सामानाधिकरण्ये हि परममहापरिमाणमिति स्यात्॥ ति

अथ विभुत्वस्य कुतः सिद्धिः। स्पर्शशून्यत्वे सति प्रत्यक्षगुणाश्रयत्वविरोधात्। अवयवित्वस्पर्श राम

शून्यत्वविरोधात्। शब्दकारणवचनात्संयोगविभागौ। संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्ति ६०

रिति सूत्रकारवचनात्संयोगविभागौ। यद्यपि द्रव्यत्वेनैव संयोगविभागयोः सिद्धिः। तथापि विपक्षे बा

धकं वक्तव्यं तदुच्यते। यदि संयोगविभागौ नभसि न स्यातां। असमवायिकारणा

स्पर्शत्वात्. अन्यथा परमाणु...

वाछेदोनोद्येतेति।यद्यपिविभिग्राहकादेवप्रमाणाद्द्रव्यत्वस्यसिद्धं।तथापिसंख्यादिनागुणेनापितत्साधयितुंशक्य
मितितदप्याह।अतइति।गुणवत्तोपद्रव्यत्वेलक्षणव्याघातादिति।अनाश्रितत्वाच्चेति।आश्रयैकस्वभावाद्वे
त्यर्थः।अन्यथासमवायेनव्यभिचारादाश्रयैकस्वभावस्यापद्रव्यत्वेगुणत्वापत्तौ।स्वरूपव्यातादिति।यद्यप्य
कत्वादेवनित्यत्वाकार्यत्वेसिद्धे।अनित्यत्वेकार्यत्वेवततःपूर्वपश्चाज्जायमानाःशब्दाःआकाशांतरव
त्तेरिन्।तस्मादेकत्वादेवपूर्वापरकोटिविकलत्वंनभः।तथापिप्रपंचार्थमाह।समानासमानेति।तथाहि।नास्या
रंभकंनभएवतैनैवतस्यानारंभात्।नापिनभोंतरमसत्त्वात्।नापिविजातीयंपृथिव्यादि।कारणक्रमेणकार्यरूपा
दिप्रसंगात्।नाप्यात्मादिकालमनांसि।स्पर्शशून्यतयातेषामनारंभकत्वादिति।शब्दाश्रयतयापरार्थत्वमस्या
क्ते।संप्रतितद्रूपकंभकतयापरार्थतामाह।सर्वप्राणिनामिति।तर्हिसर्वेषांसर्वदाशब्दोपलब्धिःस्यात्तस्यसर्व

साधारणत्वात्॥ व्यापकत्वाच्चेत्यत आह॥ श्रोत्रभावेनेति॥ ननु किमिदं श्रोत्रं न ह्यत्र पृथिव्यादेर्घ्राणादि
 वदाकाशस्यापि किं चित्कार्यद्रव्यमस्तीत्यत आह॥ ॥श्रोत्रं पुनरिति॥ पुनःशब्देन पृथिव्यादिकार्येभ्यो
 घ्राणादिभ्यो व्यवच्छिनत्ति॥ श्रवणेकर्णशष्कुल्यौ॥ तयोर्विवरं तत्संज्ञको नभोदेशः॥ अद्याप्य वृत्ति
संयोगोपचारादेश व्यपदेशः। नन्वसौवधारस्याप्यस्तीत्यत आह॥ ॥शब्देति॥ शब्देन निमित्तेन विष
यतया उपभोगः॥ सुखदुःखानुभवः तत्प्रापकाभ्यां संपादकाभ्यां धर्माधर्माभ्यामुपनिबद्धो विशिष्ट इ
त्यर्थः॥ एवं सति च विशेष्यसद्भावेप्युपभोगहेत्वदृष्टवैकल्यात्कस्य चिद्वाधिर्यं यथाशरीरसद्भावेप्युप
भोगहेत्वदृष्टवैकल्यात्सुखज्ञानाद्यनुत्पत्तिरित्याह॥ ॥तस्यचेति॥ उपलक्षणं चैतत्॥ कर्णमलादि
नाऽसुषिरव्याघातादपि बाधिर्यं भवति॥ अन्यथा भैषज्यादिप्रयोगवैयर्थ्यापत्तिरिति॥ ॥काललक्षण रामः
माह॥ ॥कालइति॥ ॥अत्र परापरेति भावप्रधानो निर्देशः॥ परत्वापरत्वयोर्व्यतिकरः पराः परत्व व्याति
२ त्व

करः। दिक्कृताभ्यां परत्वापरत्वाभ्यां विपरीते परत्वापरत्वे इत्यर्थः। परौ व्यतिकरश्च यौगपद्यप्रत्ययाश्चेति समासः। ते लिंगा
नियस्य स तथोक्तः। परत्वापरत्वयोरुत्पत्तिर्गुणेषु वक्ष्यते। ते युवस्थविरयोर्वर्त्तमाने कालमनुमापयतः। कथं। बहु
तरतपनपरिस्पंदांतरितजन्मनि हि स्थविरे युवानमवधिं कृत्वा परत्वमुत्पद्यमानमसमवायिकारणवत्कार्य
त्वादिति स्थितेरूपादीनां व्यभिचारे तपनपरिस्पंदानां वैयधिकरण्ये तदवच्छिन्नद्रव्यसंयोगासमवायि
कमिति विज्ञायते। न चाविभुनो द्रव्यस्य संयोगस्तथा भवितुमर्हतीति व्यभिचारादिति तद्द्रव्यं विभु स्यात्। न चात्माका
शौ तथा भवितुमर्हतः। विशेषगुणवत्त्वात्पृथिव्यादिवदित्याचार्याः। अत्रैवमालोचनीयं पृथिव्यादीनां संयो
गः स्यात्तद्वत्तु त्वे विशेषगुणवत्त्वमप्रयोजकं। सूर्यादिगतिप्राप्तिरहस्योपाधेः सत्त्वात्। अन्यथा मनसस्त वि २
स्त। थाभावप्रसंगात्। विशेषगुणविरहिणः स्याकारणत्वे अप्राप्तरन्यस्य कारणस्याभावात्। तस्माद्विशेषगुणवत्त्वा
२

अत्रैवमालोकनीयं२

विशेषपिपृथिव्यादीनामव्यापकत्वात्परत्वाद्यकारणत्वं व्यापकत्वाच्चात्माकाशयोस्तत्कारणत्वं भविष्यतीति को वि
रोधः॥ विप्रकृष्टबुद्धिमपेक्ष्योत्पद्यमानं विप्रकृष्टबुद्धिं निमित्तीकरोति। अल्पतरसूर्यसंचरणापेक्षया बहुतरतपन
परिस्पंदान्तरितत्वं च विप्रकर्षः। न चैतत्। स्थविरशरीरस्य स्वरूपतः संभवत्यपि न समवेतेन कर्मणा तस्य संबंधा
भावात्। अतो यद्द्वारेण संयुक्तसंयुक्तसमवायलक्षणया प्रत्यासत्त्यादित्यगतिः स्थविरमुपावर्त्तेत तत्तद्द्रव्यमस्ति।
न च पृथिव्यादि तथाभवितुमर्हति। अप्राप्तेर्व्यभिचाराच्चेति। अतः सकलमूर्तसंयुक्तेनानेन भवितव्यं। न चा
काशात्मानौ तथा विशेषगुणवत्त्वात्पृथिव्यादिवदित्याचार्याः। नन्वप्रयोजकमेतत्। अप्राप्त्युपाधिक राम ९
त्वात्। अन्यथा मनसस्तथाभावप्रसंगात्। विशेषगुणरहितस्य तस्याकारणत्वे प्राप्तेः अन्यस्य कारण ६२
स्यासंभवात्। तस्माद्विशेषगुणवत्त्वाद्विशेषे पिपृथिव्यादीनामव्यापकत्वात्परत्वाद्यकारणत्वं। व्यापकत्वा

वच्छेदाय स्वप्रत्यासत्यतिरिक्तसंनिकर्षापेक्षणात्। अन्यथा वारा(?)ण ४

सम्म २

दात्माकाशयोस्तत्कारणत्वं भविष्यतीति को विरोध इति चेन्न। आकाशस्य स्वप्रत्यासत्तिमात्रेण संयुक्तसमवायितं ध
र्ममन्यत्र संक्रामयितुमसमर्थत्वात्। तथात्वे चैकत्र भेर्यामभिहतायां सर्वभेरीषु शब्दोत्पत्तिप्रसंगात्। सूर्यक्रिया
वच्छेदी दंडसंयोगस्य संयुक्तसमवायाविशेषात्। कालस्य तत्स्वभावत्वाददयमदोषः। असिद्धदशायां प्रसंगस्याश्र
यासिद्धेः। सिद्धदशायां च बाधितत्वात्। आत्मनोपि द्रव्यांतरधर्मेण द्रव्यांतरोपासी(?)स्थिते नलिनपाटलीपु नी ४
न ४ त्रस्थितस्य स्फटिकमणेरुपरंजनप्रसंगात्। कालस्य तु विप्रकृष्टक्रियोपसंक्रमणशक्तत्वेन वा सिद्धेर्ना
यं प्रसंग इत्यवधातव्यं। तदयं प्रमाणार्थः। स्थविरादौ परत्वं तपनपरिस्पंदप्रकर्षबुद्धिजन्यं। तदन्वयव्य
तिरेकानुविधायित्वात् पटे कुविंदवत्। ते च तपनपरिस्पंदाः स्थविरशरीरप्रत्यासत्तिमपेक्षंते। स्वभावतोप्रत्यासन्न
त्वे सति तदवच्छेदकत्वात् पटावच्छेदकमहारजनरागवत्। सा च प्रत्यासत्तिर्द्रव्यकृता। प्रकारांतराभा

वेसन्निप्रत्यासन्नित्वान्नष्टे महारंजनरागप्रत्यासन्निवत् अन्यथाप्रत्यासत्त्यभावे सन्निकर्षविप्रकर्षयो
63 रसंभवात् अपेक्षणीयानुपपत्तोपरत्वानुपपत्तिप्रसंगेन व्यवहारलोपप्रसंगः। तच्च द्रव्यमितरेभ्यो भिद्य
ते विशिष्टपरत्वानुपेयत्वात् यत्तु नैवं इतरेभ्यो भिद्यते न तदेवं यथा पृथिव्यादिरिति एतेनापरत्वमपि
गतयाख्यातं यौगपद्यमेककालता अयौगपद्यमनेककालता। चिरत्वं दीर्घकालता क्षिप्रत्वमल्पकालता॥
अत्र कालशब्देन कालोपाधयः सूर्यगत्यादयो उच्यन्ते। तैस्तु प्रत्ययैः कालोऽनुमीयते। ननु प्रत्ययाः का
क्षिप्रतमा रणानि यौवाकालं व्यवस्थापयेयुः न प्रथमः आत्मेन्द्रियाणां तत्कारणत्वात् न द्वितीयः तस्यातीन्द्रिय राम
त्वात् ऐन्द्रियकप्रत्ययविषयत्वविरोधादित्यत आह। तेषामिति। विषयेषु घटपटादिषु युगपद्वर्तन्ते ६३
युगपद्भवन्तिर्युगपद्वर्तन्ते इत्यादीनां पूर्वप्रत्ययविलक्षणानां द्रव्यगुणादिप्रत्ययविलक्षणानां द्रव्यादि

प्रत्ययस्यानुवृत्तावपनुवृत्तेस्तदनुवृत्तावपि तेषां व्यावृत्तेः विलक्षणत्वेन विनिश्चितानामनु
सत्तावन्यस्य निमित्तस्यासंभवात् क्वाचित्कमतरेणेति शेषः ॥ युगपज्जायंते कुर्वंत्यवतिष्ठंते
विनश्यंतीत्यादीनामेकस्मिन्काले एकसूर्यगतौ एकसूर्यादिगतस्य वच्छिन्नादुत्पत्तिः ॥
नचाप्राप्ताः सूर्यादिगतयो विषयीकृतरमवच्छेत्तुमुत्सहंते । न च स्वरूपेण तासां प्रा
प्तिरस्ति ॥ तस्माद्विशिष्टप्रत्ययान्यथानुपपत्त्या विशेषणप्रापकं द्रव्यमुपकल्प्यते ॥ अ
न्यथा निमित्तमंतरेण नैमित्तिकस्यासंभवप्रसंभवप्रसंगः न च वाच्यं संबंधस्य प्रती
तौ विशिष्टप्रत्ययः विशिष्टप्रत्ययेनैव च तत्प्रतीतावितरेतराश्रयत्वमिति । न त्वत्र संबंधो
विशेषणं अपि तु क्रिया सा च प्रतीतैवेति सर्वं सुस्थं ॥ विशेषणसंबंधो विशिष्टप्रती
त्यै सत्तयैवोपयुज्यते न तु स्वज्ञानेन अन्यथा समवायस्यातींद्रियत्वात् ॥ गुणकर्मसामा

राम

राम 64

न्यविशिष्टप्रतीतिर्वैशेषिकनये दत्तजलांजलिः स्यात्॥ परेषामप्यहं शरीरीत्यादावदृ
ष्टस्य नियामकस्याप्रतीतौ विशिष्टप्रत्ययो न स्यात्॥ तस्माद्विशिष्टप्रत्ययान्यथानुप
पत्त्या विशेषणानां संबंधः प्रतीयते ननु संबंधाप्रतीतौ विशिष्टप्रतीतिरेव न सिध्यती
ति स्थितिः॥ यत्तत्साधर्म्यमुक्तं सर्वेषामपि निमित्तकारणत्वमिति तदाह॥ सर्वकार्या
णामिति। उत्पत्तिरात्मलाभः स्थितिरविनाशस्तत्तत्कर्मवत्सहकारिसंबंधः॥ विना
विनाशः प्रध्वंसः एतेषां हेतुः अत्र प्रमाणमाह॥ तद्यपरेशादिति॥ तेन कालेनोत्पत्त्यादीनांम
पदेशाद्घोत्पन्नः श्वःपरश्वो वेति। इदानीमत्रास्ति अद्य नष्टः श्वःपरश्वो वेति॥ अपदे ६४
शात् यथा चैतत्तत्योक्तं॥ व्यवहारांतरहेतुत्वमाह क्षणेति। उत्पन्नं द्रव्यं॥ यावद्गुणं तु
त्पन्नं सत् तत्संयोगी यावन्न परः उत्पन्ने कर्मणि यावन्न विभागः तावान् कालः क्षणः

अथवा सामग्री कार्यरहितात्मण इति संक्षेपः। आक्षिपत्यमकमेकं निमेषाद्युत्पादिगणितशास्त्रानुसारेणाद्यं। यद्यपि धर्मिग्राह
कादेव प्रमाणात्संख्यादयः सिद्धाः। तथापि आकाशादिव्यवच्छेदार्थं विशेषगुणविरहमाविष्कर्तुं सामान्यगुणानाह। तस्य गु
णा इति। अत्रापेक्षत्वादि समस्तसंख्यायोगे सिद्धे। विशिष्टपरत्वाद्यनुमेयस्य सन्तानेकत्वव्यवच्छेदेन नियतमेकत्वं विव
क्षन्नाह। कालो लिंगाविशेषादिति। व्यापकतया एकस्यैव सर्वत्र स्वर्यगत्युपनायकतया सन्निकृष्टविप्रकृष्टबुद्ध्युत्पा
दनद्वारेण विप्रकृष्टवर्त्तिपरत्वापरत्वोत्पत्तौ निमित्तत्वस्योपपत्तेरनेकत्वकल्पनायां कल्पनागौरवप्रसंगादित्यर्थः। तदुक्तं
विधानात्पृथक्त्वमिति। एतदपि पूर्ववत्। कारणे काल इति वचनात्। कारणे कालाख्य इति सूत्रकारवचनात्
परममहत्परिमाणं। विशिष्टपरत्वाद्यसाधारणकारणे द्रव्ये। अविभोर्विप्रकृष्टवर्त्तिमूर्त्तगतपरत्वाद्युत्पत्तौ सूर्यादि
गत्युपाध्युपनयनाशक्तेः परममहत्त्वाभावे चैवम्भवानुपपत्तेः। परममहत्त्वं कालस्य ध्येयमितीत्यर्थः। काल

कारणपरत्वादितिवचनात्संयोगः। कारणपरत्वात्कारणापरत्वाच्च परत्वापरत्वे इति सूत्रकारवचनादित्यर्थः।
कारणंपरत्वादेः कालस्यपरत्वापरत्वे तत्पादकौ मूर्त्तसंयोगानुपनाशात्तद्विनाशकत्वाद्विभाग इति। तस्य सं
योगस्योत्पन्नस्य सत्या त्रयेयो विनाशकोविभागस्तद्विनाशादेवसिद्धः। एतेन धर्मिग्राहकप्रमाणस्य द्रव्य
 त्वस्ववासंख्यादिपंचकसाधनसहायास्तर्कादर्शिताः। तथाहि॥ एकत्वाभावे द्वित्वाद्यसिद्धिः। असमवा
यिकारणाभावात्। पृथक्त्वाभावे एकत्वानुपपत्तिः। व्यापकव्यावृत्ते द्विपृथक्त्वाद्यसिद्धिश्च। परम राम
महत्परिमाणाभावे वैभुवानुपपत्तेः। संयोगानुपपत्तौपरत्वाद्यसिद्धिः। असमवायिनिमित्तयोरभावात्॥ ६५
विभागाभावे कार्यस्य संयोगस्यानित्यत्वप्रसंग इति। तस्याकाशवदिति। यथाकाशस्य धर्मिग्राहकादेव
द्रव्यत्वं सिद्धं। गुणवत्वादपि सिध्यतीति तथाकालस्य यथाकाशस्यैकत्वादेवनित्यत्वं सिद्धं समानासमा

२ काललिंगविशेषादिति। अंशसामुख्ययारत्यापारमइतिसन्निकृष्टप्रागभाव
माह।

तज्जातीयकारणाभावादकार्यतयापिसिध्यति। तथाकालस्यापीत्यर्थः। स्यादेतत्। यद्येकः कालः कथमतीताना
गतवर्त्तमानभेदेनव्यवह्रियते। नहिक्षणलवादिवद्वर्षादिवद्वा अतीतादयोप्युपाधिभेदाः संति। किंतुतएव
भावाः। भावेवातएवसंतु किमंतर्गडुना कालेनेत्यत आह। क्रियेतिव्यापारमभिनिर्वृत्तिरितिफलसिद्धिं।
निरोधइतिविनाशं। तेनप्रत्येकमनागतादित्रयंधर्मधर्मिभेदाद्द्विविधमुक्तंभवति। तथाहि। भविष्यति
पटइतिपटस्यधर्मिणः प्रागभावावस्थिता भविष्यत्ता। तदुपलक्षितः कालोभविष्यन्नपटंभावयिष्यतिकुविंद
इत्यत्रधर्मिणोवर्त्तमानत्वेपिपटोत्पत्त्यनुगुणव्यापारप्रागभाववत्ताकुविंदस्यभविष्यत्ता। तदुपल
क्षितः कालोभविष्यन्नेवमुत्पाद्यतेपटः स्मारयतिपूर्वानुभवानुभूतमर्थमनुभावयतिपूर्वकर्मस्वानु
रूपंफलमितिधर्मिणामभावेपिव्यापारसत्तावर्त्तमानता। तदुपलक्षितः कालोपिवर्तमानः। अस्यात्मा

विद्यते व्योम वर्त्तते पट इत्यादौ धर्मिसत्तैव वर्त्तमानता। तदुपलक्षितः कालोऽपि वर्त्तमानः। एकमभूत्पट अका-
र्षीत्पटमित्यादौ धर्म्यवस्थानेऽपि फलसिद्धौ तदुत्पादानुगुणव्यापारप्रध्वंसस्थितिरतीतत्वं तदुपलक्षितः का-
लोऽप्यतीत इत्युच्यते। नष्टो घट इत्यादौ तु धर्मिस्वरूपनिवृत्तिरेवातीतत्वं तदुपलक्षितः कालोऽप्यतीत इति। 66
न चैष व्यवहार उपाधिभेदमात्रेण शक्यते यदा भारते वर्षे मध्याह्नः तदोत्तरेषु कुरुषु अर्द्धरात्रं इत्यादौ
संबंधाभावात्। बौद्धः संबंधो भविष्यतीति चेत्। सत्यं। तदर्थमेव निमित्तमनुसराम इति। अखंडस्वरूपस्यैको- राम
प्युपाधिभेदादनेकव्यवहारमातनोतीत्यत्र दृष्टांतमाह। मणिवदिति। यथा स्फटिकादिरेकरूपोऽपि नील- ६६
पीतोपाधिभेदान्नीलः पीत इत्यादिव्यवह्रियते तथा कालोऽपीत्यर्थः। ननु किं मणेः पीतादिव्यवहारवत्का-
लेनागतादिव्यवहारो भ्रांत इत्यत आह। पावकवदिति। न चौपाधिक इत्येतावतैव भ्रांतता माभूत्

पावकादिव्यवहारोऽपि भ्रांतः किंतु अतस्मिंस्तदिति। नचैवंप्रकृत इत्यर्थः॥ ॥राम॥ ॥गुणेपरत्वापरत्वलिंगत्वं
दिशः स्फुटीभविष्यतीत्यभिप्रायवांस्तदुपेक्ष्य पूर्वापरादिप्रत्ययलिंगतामाह॥ ॥दिगिति॥ ॥तदेवस्फोरय
ति। मूर्त्तेति॥ ॥अमूर्त्तद्रव्यस्यावधित्वं नास्ति व्यापकत्वात्॥ अतएवोक्तं मूर्त्तद्रव्यमवधिं कृत्वेति। व्यापकत्वा
देव तेषां पूर्वपरादिप्रत्ययविषयत्वं नास्तीत्यत उक्तं। मूर्त्तेष्वेवेति। एवं लोत्यादौ तृतीयाविधाने प्रकृत्यादि
भ्यः उपसंख्यानमिति तृतीया। पूर्वं दाक्षिणमित्याद्यर्थः। ननु च प्रत्ययेन निमित्तं सिद्ध्यति दिशस्तु कुतः सिद्धि
रित्यत आह। अन्यनिमित्तासंभवादिति। अन्येषां द्रव्यादीनां व्यभिचारात् प्रथमचरमादित्यसंयोगाद्यत्र नि
मित्तं। न च तेऽपि द्रव्यांतरवर्त्तिनो द्रव्यांतरे अनुपसंक्रांता विशिष्टप्रत्ययानुत्पादयितुं ईशते। ततो भवित

संवेद्य
यं परममहता द्रव्येण। न चाव्यापकमाकाशस्य सूर्यसंयोगाविशिष्टप्रत्ययानुत्पादयंति न वा काशात्मानौ तथा
भवितुमर्हतः। पूर्वकादेव न्यायात्। कालो भविष्यतीति चेत्। न। कालस्य क्रियामात्रोपाधिनिबंधनव्यव
हारहेतुत्वात्। अन्यथा जगति वर्त्तमानेकत्ववत् आव्यादेरेकत्वप्रसंगात्। अस्माकं प्राच्या अन्येषां प्र
तीचीत्वात्। न चैवं कालोपि। नह्यन्यधर्मोपाधिकं व्यवहारमन्यत्र कुर्वाणः प्रमात्र नियममपेक्षते
६७ नन्वपेक्षत एव यावत् दिवसस्तस्यान्यत्र रात्रित्वात् सत्यं· दिग्विशेषमंतर्भाव्य। ननु वर्त्तमानादेस्त ना॰राम
था वर्त्तमानस्य सर्वत्र वर्त्तमानत्वात् ननु प्राच्याः सर्वान् प्रति प्राचीत्वं तस्मात् द्विलक्षणेन व्यवहा ६७
रेण विलक्षणमेव निमित्तमाकर्षणीयं। उपाधिरेव तथास्त्विति। मैवं न। सूर्यसंयोगस्य सौरत्वात्। धा२
कथं तर्हि व्यवहारवैलक्षण्यं दिग्वादिनापि समर्थनीयमिति चेत्। उपनायकस्वभाववैलक्षण्येन त

दुरुपपत्तेः। दृष्टोयं स्वभावभेदः यद्यमात्भेदमाश्रित्यैव परधर्मोपनायकत्वं। ननु न्वयं काष्ठस्यैव स्वभावभेदः किं न कल्प
नइति चेत् न। क्रियायां प्रत्यन्यथादर्शनात्। अपि च। अन्यधर्ममात्रमन्यत्रोपदध्यादिति काष्ठस्य स्वभावः क्रिया
मात्रं वा। आद्ये सर्वधर्मोन्सर्वत्र संक्रामयेदित्यतिप्रसंगः। द्वितीये संयोगोपनायकमन्यत्कल्पनीयं। अन्यथा
प्राप्यादिव्यवहारानुपपत्तेः। न च क्रियासंयोगयोरेकजातीयत्वमस्ति येनान्यदन्यत्रोपदध्यातीत्युपपद्ये
त। तस्मात्क्रियोपसंक्रान्तिरिव रविसंयोगोपसंक्रान्तिरपि नियतस्वभावं द्रव्यमुपस्थापयतीति सुष्ठूक्तं अ
न्यनिमित्तासंभवादिति। तत्सिद्धमेतत्। दिगितरेभ्यो भिद्यते उपाध्युपनयनद्वारेण पूर्वापरादिप्रत्ययं तु लाह
यद्वा नैवं न दृष्टेव यथा पृथिव्यादि। तद्गुणानाह। तस्ये स्यो गुणा इति। अत्रापि संख्यादीनां धर्मिग्राहकप्र
माणादेव सिद्धौ द्रव्यत्वाद्यविशेषगुणव्यवच्छेदे तात्पर्यं। तर्कान्तरसूचयति कालवदेतत्सिद्धा इति। यथा

यथाकालल्लिंगाविशेषादेकत्वं। तथादिग्लिंगाविशेषादेकत्वं। यथातदनुरोधान्पृथक्त्वं। कालेतथादिश्यपि।
यथाकारणेकालइतिवचनात्परममहत्परिमाणं तथादिश्यपि। यथाकारणपरत्वादिवचनात्काले संयोग
स्तद्दिश्यपि। यथातत्रतद्विनाशकत्वाद्विभागः तथादिश्यपीत्यर्थः। यद्यैकैवदिक्कथंदशदिशइतिप्रसिद्धि
रित्यत आह॥ ॥दिग्लिंगेति। अंजसामुख्यायारत्यापरममहर्षिभिः सर्गादिभवैर्मरीच्यादिभिर्दशविधाः
संज्ञाः कृताः। किमर्थं श्रुतिस्मृतिलोकव्यवहारार्थं। प्राचीनप्रवणेवैश्वदेवेनयजेत। नप्रतीचीशिराःश
यीतेतिश्रुतौव्यवहारः। आयुष्यंप्राङ्मुखोभुङ्क्ते इतिस्मार्त्ताः। दक्षिणेनयाहीत्यादिलौकिकाः तदर्थं। किं
ताःपारिभाषिक्योनेत्याह। अन्वर्थाअनुगमतार्थाः केषांभगवतःसवितुर्यसंयोगास्तेषां। किंरूपस्यसवि
तुर्मेरुंप्रदक्षिणमावर्त्तमानस्यपरितोभ्रमतः। पुनःकेषामन्वर्थाइत्यत आह॥ लोकपालपरिगृहीतदि

69

राम ६९

कुप्रदेशानामिति॥ लोकपालाइंद्रादयः। कथं ताः सवितृसंयोगविशेषार्थोनुगमेन दशविधाः संज्ञा इत्यत आह प्रा
च्यादिभेदेनेति। तथाहि। प्रथममग्रस्यामंचतिसवितेतिप्राची। अवागस्यामंचतीत्यवाची। प्रत्यगस्यामंचतीति प्रतीची।
उदगस्यामंचतीति उदीची। एवं प्रागवाची अवाक्प्रतीची प्रत्यगुदीची उदक्प्राची। सूर्यापेक्षयायतः पृथिवी
सा अधस्तात् पृथिव्यपेक्षयायतो नक्षत्राणि सा ऊर्ध्वा ततो भक्त्या उपचारेण दशदिशः सिद्धा इत्येकत्वाविरोधइ
स्पर्शि॰ त्यर्थः। ननु लोकपालपरिग्रहनिबंधनाभिः सह भक्त्यापि विंशतिर्दिशः स्युः अत आह। तासामिति॥ येवास्मा
कं प्राचीसैवमाहेंद्रीति निमित्तमात्रं भिद्यते न तु नैमित्तिकमपि भिद्यते इत्यर्थः। उपलक्षणं चैव तत्र। पूर्वाप
रादिसंज्ञा अपि तत्समानार्थाः ननु भिन्नार्था इति भक्त्यापि दशैव दिश इति॥ ॥राम॥ ॥ उद्देशक्रमानु
रोधेन दिग्लक्षणानंतरं आत्मलक्षणमाह॥ आत्मत्वेति॥ आत्मत्वं नाम सामान्यविशेषः तदभिसंबंधा

६९ त्मा

दात्माइतरेभ्यो भिद्यतइति पूर्ववद्व्याख्येयं। ननु शरीराद्यतिरिक्तं आत्मानं नोपलभामहे। गौरोहं स्थूलोहं ब्राह्मणोहं
मानुषोहं गच्छाम्यहं जातोहं पितुः पुत्रः पुत्रस्य पिता ज्येष्ठस्य कनीयान् कनीयसो ज्यायानिति गुणकर्मसामान्य
विशेषजन्माद्यधिकरणमात्मानं वक्ष्यदि नेव सर्वः प्रत्येति न स्वरूपं विभुमचलमनंतमजममूर्त्तं परमात्मानं
कश्चित्स्वप्नेप्यनुभवतीत्यात्मप्रयासिद्धमात्वं। यथाप्रसिद्धाश्रयं च पृथिव्यादिना गतार्थं तथाप्यहं ज्ञानेनं
यतेहं भुंजइति ज्ञानाद्यधिकरणतया मनसा आत्मानुभूयत एव। अहंकारस्य शरीरादिविषयत्वेनाप्युनि
वत्स्यतइत्यभिप्रायः। तथाप्यात्मत्वं स्वरूपासिद्धं परात्मनोप्रतीतेः। व्यक्तिभेदासिद्धो सामान्यविशेषासि
द्धेरित्यत आह। तस्यापि सोक्ष्म्यादिंद्रियग्रहणायोग्यताविरहः। तस्मादप्रत्यक्षत्वेन तस्य करणैः श्रोत्रा
दिभिः समधिगमः क्रियते। ननु करणान्यप्रत्यक्षाणीत्यत आह। वाद्याद्युपलब्ध्यानुमितेः शब्दाद्युपलब्ध

राम
६५२

यःकरणसाध्या क्रियात्वात् छिदिक्रियावदित्यनुमितेः। कथं पुनः करणैरात्मानुसमधिगम्यत इत्यत आह। वास्या
दीनामिति। अनेन व्याप्तिर्दर्शिता प्रयोगस्त्वेवं। श्रोत्रादीनि कर्तृव्यापार्याणि करणत्वात्। वासीवत् करणत्व
ममीषां धर्मिग्राहकप्रमाणादेव सिद्धं। ननु कस्यचित्करणस्य वास्यादेः पाण्यादिकरणप्रयोज्यत्वदर्शने
पि यथा न सर्वकरणं करणान्तरप्रयोज्यं अनवस्थानात्। तथा कस्यचित्करणस्य कर्तृप्रयोज्यत्वेपि न स
र्वं भविष्यतीत्यत्र को विरोधः। उच्यते। कारकेषु समानजातीयकारकापेक्षानियमो नेष्यते अनवस्था
नात्। विजातीयकारकापेक्षानियमस्त्विष्यत एव। अन्यथा लक्षणव्याघातादिति। वस्त्रादीनां च कर्त्र
नपेक्षत्वे तत्साध्यक्रियाप्रतिसंधानानुपपत्तिप्रसंगात्। तस्माद्योसौ श्रोत्रादीनामेकोधिष्ठाता स आत्मे
ति प्रमाणान्तरमाह॥ ॥शब्दादिषूपलब्धिप्रसिद्ध्या ज्ञानेन प्रसाधको ज्ञाता न यथा हि। ज्ञानं कचिदाश्रि

तंकार्यत्वात्। गंधवत्। कार्यत्वमेषामनृत्पत्ताभावित्वलक्षणं प्रत्यक्षसिद्धं। कार्यस्याप्यनाश्रितत्वे समवायिकारण
व्यावृत्तौ इतरयोरपि व्यावृत्तेरकारणकत्वप्रसंगः तथापि शरीरेंद्रियमनसामन्यतमस्मिन्नाश्रितं भवि
ष्यतीत्यत आह। न शरीरेंद्रियमनसां चैतन्यमिति अग्रे भविष्यति कुतः अज्ञत्वात्। अज्ञत्वं व्याप्तत
70 येव तेषां सिद्धमित्यर्थः। एतदेव दर्शयति। न शरीरस्य चैतन्यं न शरीरं चैतन्याश्रय इत्यर्थः घटा
दिवद्भूतकार्यत्वादिति भूतत्वात्कार्यत्वाद्वेत्यर्थः। अन्यथासमर्थविशेषणो हेतुः स्यात् ननु चैतन्याश्र राम
[illegible] यत्वेन भूतत्वस्य वा कार्यत्वस्य वा को विरोधः अत आह॥ मृतेष्वसंभवादिति यदि हि शरीरविशेषगु ७०
णश्चैतन्यं भवेत् रूपादिवद्यावद्द्रव्यभावित्वनियमात् भवेदेवं कारा यावत्पृथिव्यादिद्रव्य [illegible] भवेत्
पृथिव्यादिशरीरविशेषगुणस्य यावद्द्रव्यभावित्वनियमात्। पृथिव्यादिचतुष्टयविशेषगुणस्य च याव

घातत्वं।नेंद्रियाणां चैतन्यमिसनुवर्त्तते कुतः करणभावात् कुठारादिव ×२

त्पृथिव्यादिव्यक्तिवृत्तित्वात् अत्राप्यनियमे को विरोध इति चेत्। शरीरस्य कार्यत्वेन तयोरत्र्त्तः प्रागनुभवाभावेन संस्का
राभावात् स्मृत्यनुबंधानुपपत्तिरिति। एतत्तर्कप्रदर्शनार्थमेव कार्यत्वस्योपादानमित्यवधेयमिति शेषः त
र्कमाह। उपहते त्विति। अनुभावानुविधायितया तावदनुभवकार्या स्मृतिः सोऽपि पद्यंतराकं विदतिशायनविद
ध्यात् विरुद्धस्तोन स्मृतिं जनयेत् अनुत्पन्ननिरन्वयध्वस्तयोरविशेषादतिशायमप्यादधानः स्वसमाना
श्रयमेवादधीत अन्यत्राधाने तिप्रसंगात् तस्मात्स्मृतिसंस्कारानुभवाः समानाश्रया इति नियमः। तथा चे
न्द्रियेषु चैतन्याश्रयेषु स्वीक्रियमाणेषु तेषामुपघाते अंधादिभिः पूर्वानुभूतानां रूपादीनामस्मरणप्रसंगः घ
टादीनां विषयाणां कुठारादीनां करणानाम चैतन्ये जीवनविरहो हेतुः। तत्राप्याध्यात्मिकवायुविरहः। त
त्रापि बाह्यघातप्रग्रहाभावः तत्रापि रथ्यादेरभावः अत्रार्थे तर्कं सूचयति। विषयासान्निध्ये चेति। यदि हि वि

बयाश्चेतयेवन्तेषामसंन्निधावनुस्मृतिर्नस्यात्।असन्निधिस्त्वविनाशोहेतुकोद्रष्टव्यः।नह्यसत्यनुभवितरि
स्मरणमुपपद्यतेकारणाभावादितिभावः।अनुभवात्मश्चाद्भावेनस्मृतिरेवानुस्मृतिरुच्यते।अस्तुतर्हि
नित्यत्वात्सर्वविषयत्वाद्दमूर्त्तत्वाच्चमनसश्चैतन्यमतआह॥ ॥नापिमनसइति।अयमभिसंधिः।ज्ञानाश्र
यतयामनोनुमीयमानंकर्तृस्यात् नतुकरणंतथाचयुगपदनेकविषयसंनिधानेनेकचक्षुरादिकरणा
धिष्ठानेयुगपदनेकान्यात्मचेतनानिअनेकाश्चस्मृतीरारभेत।नहिकरणवत्कर्तुरप्ययंधर्मः।य
या देकमेवकिंचमभिनिर्वर्त्तयति।तथात्वेव्यासंगोनस्यात्।कारणान्तरापेक्षायांचसंज्ञाभेदमात्रं।अथक राम ७१
रणतयैवतदनुमानेज्ञानाश्रयतयातदनुमानस्यतइत्यतआह॥ ॥स्वयंकरणभावाद्वेति।सिद्धेहिचेत
न्याश्रयेकर्त्तरिकरणंमनोनुमीयते।तथाचधर्मिग्राहकप्रमाणबाधइतिभावः।दिक्कालाकाशानांचस्र

सक्किरेवनाश्रितेषांतु बुद्ध्यादीनामिन्द्रियगुणत्वप्रतिक्षेपेणैव शब्दादिभिरुपस्थानात् अतःपरिशेषात् असक्तप्रतिषेधे अन्यत्राप्र
ए संगात् शिष्यमाणतया आत्मकार्यत्वात् पृथिव्याद्यसमवायित्वे सति कार्यत्वादित्यर्थः॥ तदयंप्रयोगः। ज्ञानं पृथि
व्याद्यतिरिक्तद्रव्याश्रितं तदनाश्रितत्वे सति कार्यत्वात्॥ यत्पुनः पृथिव्याद्यतिरिक्तद्रव्याश्रितं न भवति तत्तदना
श्रितत्वे सति कार्यमपि न भवति यथा गंधादिरिति केवलव्यतिरेकी॥ स्यादेतत्। आत्मत्वे त्वहेतुसिद्ध्यर्थं परा
त्मप्रसाधनार्थं स्वतंत्रयमारंभः। यथा वपरात्मा परोक्षः तथा तद्बुद्धिरपि परोक्षैव तथात्वे किं केन साध्यत इत्या
शंक्याह॥ ॥शरीरसमवायिनीभ्यामिति॥ विग्रहस्याधिष्ठातानुमीयते अधिष्ठातृत्वस्य विवरणं प्रयत्नवा
न्निति संयोगीति शेषः॥ लिंगमाह॥ ॥प्रवृत्तिनिवृत्तिभ्यामिति॥ प्रवृत्त्या च निवृत्त्या चेत्यर्थः॥ अनयोः प्रत्ये
कमेव लिंगत्वात् क्रियामात्रस्य चानैकान्तिकत्वमाशंक्याह॥ ॥हिताहितप्राप्तिपरिहारयोग्याभ्यामिति॥

हितंसुखसाधनंअहितंदुःखसाधनंतयोर्यथासंख्यंप्राप्तिपरिहारौतद्योग्याभ्यामितियोग्यग्रहणंक्वचिदंतराय
संभवेनप्राप्तिपरिहारयोरसिद्धावपि।चेष्टात्वस्यप्रयोजकत्वमादर्शयितुमेवंभूतेनप्रवृत्तिनिवृत्तिप्रायेणशा
रीरतदवयवसमयापिन्या चेष्टेतिशरीरसमवायिनीभ्यामितिस्वरूपमुक्तं।यथाकृतादीनामपिशरीरत्वं च
तथाचोक्तमधस्तात्वक्ष्यतेच।अत्रदृष्टांतोरथकर्मणासारथिरिवेति।अत्रप्रयोगः।विवादाध्यासितंशरी
रं।प्रयत्नवदधिष्ठितंहितप्राप्तियोग्यक्रियावत्त्वात् अहितपरिहारयोग्यक्रियावत्त्वाद्वारथवत्।विपक्षे
प्रयत्नवत्संयोगव्यतिरेकेणप्रवृत्त्यनुपपत्तिप्रसंगःतत्कार्यत्वादितिबाधकं।प्राणादिभिश्चेति।अनेन
प्राणापाननिमेषोन्मेषजीवनमनोगतींद्रियांतरविकाराःसुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनोलिंगानी राम
तिसूत्रंस्मारयति।कथमिति।केनप्रकारेणात्रव्याप्तिग्राह्येत्यर्थः।उत्तरं।शरीरेति।लिंगत्वमभिव्यन ७२

क्रि। विकृतेति। शरीरपरिगृहीतः शरीराभ्यंतरचारी मनःसहचर इंद्रियावत्। तस्मिन्विकृतं स्वभावसिद्धं तिर्य
ग्गमनादन्यादृशं कर्म ऊर्ध्वाधोगमितृत्वलक्षणं तस्य दर्शनादिति व्याप्तिग्राहकं प्रमाणमुक्तं भस्त्राध्मा
पयितेवेति दृष्टांतः। प्रयोगस्त्वेवं। जीवच्छरीरं भोक्तृप्रयत्नवदधिष्ठितं संमूर्छनाभावे सति विकृतक्रियपवनाश्र
यत्वात्। भस्त्रादिवदिति। अथवा शरीरो वायुः भोक्तृप्रयत्नवत्प्रेरितः असति संमूर्छने विकृतक्रियवायुत्वा
१६ त् भस्त्रावायुवत्। लिंगांतरं विवृणोति। निमेषेति। अक्षिपक्ष्मणोः संयोगहेतुः कर्मविशेषो निमेषः। विभागहे
तुरुन्मेषस्तेनापि प्रयत्नवाननुमीयते। नन्वेतद्वातविकारजनितेन नयनपरिस्पंदेनानैकांतिकमि
त्यत आह॥ ॥नियतेति। नियतेन यादृङ्निमेषकर्म प्रयत्नवदन्वयव्यतिरेकानुविधायि दृष्टं दृष्टांते ता
दृशेनेत्यर्थः। अथ किमिदं तादृशत्वं। इच्छापूर्वकमिति चेत्तन्न। तस्याप्यसिद्धत्वसाध्यत्वात् हिताहितप्रा

७३

पिपरिहारार्थं तस्य विवक्षितत्वात् प्रवृत्तिनिवृत्तिभ्यामेव गतार्थत्वात् । स्वरूपप्रपंचार्थमुपन्यासः । अत्रापि प्रयोगः
जीवच्छरीरं भोक्तृप्रयत्नवदधिष्ठितं विशिष्टनिमेषोन्मेषक्रियात्वात् दारुयंत्रवत् । विशिष्टं वा निमेषोन्मेष
कर्म वत्पूर्वकं विशिष्ट । निमेषोन्मेषकर्मत्वात् दारुयंत्रनिमेषोन्मेषकर्मवत् । जीवनलिंगकमनुमान
माह ॥ ॥ देहस्येति । वृद्धिरवयवोपचयः भग्नक्षतयोर्विघटितविशिष्टयोरस्थिपर्वमांसभागयोः
संरोहणं सघटनं तयोर्निमित्ततयाधिष्ठितानुमीयते । शरीरावयवानां वृद्धिभग्नक्षतयोः संरोहणे ।
प्रयत्नवन्निमित्तके वृद्धित्वात्संरोहणत्वात् गृहकुड्यवृद्धिवत् । तत्संरोहणवत् । सूत्रेव जीवनशब्दो राम
जीवनकार्यं वृद्धिसंरोहणे लक्षयति । मुख्यतो हि स्वकर्मोपार्जितशरीरावच्छिन्नेनात्मना मनसः संयो ७३
गो जीवनमिति । क्वचित्संरोहणादीत्यादिपदं श्रूयते तेन नाहारोपादानमलोत्सर्गो गृह्यते । तथाहि जीवच्छ

शरंप्रयत्नवदधिष्ठितं अभिमतानभिमतोपादानोत्सर्गवत्वात् यंत्रधारागृहवदिति। नचैतत्तद्धस्ताद्गत
वद्ध्यादिनैकांतिकं। तत्रापि भोक्तृविशेषाधिष्ठानस्येष्टत्वात्। लिंगांतमाह॥ अभिमतेति। अभिमतानभिमतविष
योरूपादिः तद्ग्राहकं करणं चक्षुरादि तेन संबंधः संयोगस्तन्निमित्तं कारणं यन्मनःकर्म तेनात्मानुमि
यते गृहकोणेषु व्यवस्थितो गृहकोणव्यवस्थितः तमेकमुद्दिश्य पेलकस्य जन्तुकगुडकस्य प्रेरको
दारुको बालक इवेति। अयमाशयः प्रयत्नज्ञानायोगपद्यान्मनस्तावत्त्वतिशरीरे रकं अणुगतिमत्त्वे
नि सिद्धं तन्नस्वयंत्वात्प्रयुज्यते। मनः प्रयत्नवदधिष्ठितं गुरुत्वद्रवत्वादिकारणांतराभावे सति गति
मत्त्वाद्दारकप्रेरितपेलकवदिति। अदृष्टोपगृहीतेवत्तच्च क्रियास्यादिति चेत्। क्वचिदेवमपि यद्यप्येवमप्या
त्मसिद्धिस्तथाप्यभिमतेत्यादिनाइच्छानुविधायिनः कर्मणो लिंगत्वेन विवक्षितत्वात्। अयत्नवदधिष्ठा

त्वसिद्धिः। यद्यपि ज्ञातमिच्छया विषयी क्रियते। इच्छाविषयश्च प्रयत्नस्य विषयः स्यात्। मनस्त्विंद्रियं तदज्ञातं क
थमेवं भविष्यतीति तथापि त्वगिंद्रियेण रसमलधातुदोषवहनाडीवन्मनोवहनाडीनामुपलंभाज्ज्ञो
नरविच्छाप्रयत्नाव दूरविप्रकर्षेणत्तदपि व्याप्नुतइत्युच्यते। अदृष्टस्य नियामकत्वाद्वा। तत्रैव तत्रात्र
७५ त्यक्षं। न हि जलाद्यभ्यवहारहेतवो मलाद्युत्सर्जनहेतवो नाड्यश्च स्पर्शेनोपलभ्यंते। न वा तद्विषयानप्र
यत्नैः। अनाद्यभ्यासवासनावशाददृष्टविशेषनियमात्। स्पर्शनप्रत्यक्षमेवत्तत्प्रकारमेषितव्यं। राम
तथाप्रवृत्तेरपीति। इंद्रियांतरविकारं विवृणोति। नयनेति। नयनस्य चक्षुषो विषयः चिरबिल्वादिरूपं त ७८
स स्यालोचनं ग्रहणं तस्यानंतरं रसस्यानुस्मृतिः। तदनंतरं व्याप्तिस्मृतिः तदनंतरं तथाविधरसानुमान
मिति। अनेन क्रमेणेंद्रियांतरस्य रसनस्य विकारो दंतोदकसंप्लवलक्षणः तस्य दर्शनादुभयदर्शानुमी

यतोऽभाभ्यामुभयं दृष्टं शीलमस्येति उभयदर्शी अनेकगवाक्षांतर्गतप्रेक्षकवदिति दृष्टांतः प्रयोगस्तु न
यनादीन्द्रियमचेतनं नियतविषयत्वात् गवाक्षवत्। यद्वा चेतनो नियतविषयेभ्यो भिद्यते प्रतिसंधातृत्वात् प्राक्
२ प्रत्यग्गवाक्षदर्शीकवदिति अन्यथान्येन दृष्टस्यान्येनास्मरणात् प्रतिसंधानानुपपत्तौ विद्वानुपपत्तेर्विकारानुप
पत्तिः कारणाभावादिति। ननु भस्त्रादिषु सर्वत्र प्रयत्नवानधिष्ठाता शरीर उपलब्धः। तथा च यथासिद्धदृष्टांतबलेन
विग्रहस्यापि तथाभूत एवाधिष्ठातानुमातुमुचितः। अनवस्थाभयान्नैवमिति चेत्। तर्हि विग्रह एव प्रयत्नवानस्तु
हतेता। तोऽप्यधिकेनाधिष्ठात्रेति। न प्रतिसंधातुस्तथाभावात्। शरीरस्य च भेदेन तथाभावानुपपत्तेः॥ भूतत्वका
र्यत्वादिना च प्रागेव तस्य चेतन्यप्रतिषेधात्। प्रतिषेत्स्यमानत्वाच्चेति। एवं कार्येण कारणमनुमाय गुणेन गु
णिनमनुमिनोति। सुखेनेति। तथा हि। सुखादयो द्रव्याश्रिताः गुणत्वात् रूपवदिति प्रयोगः। अनाश्रितत्वे च

याद्न्यत्राश्रितत्वे वा गुणत्वव्याघातात्। सिद्धं च गुणत्वमेषां कार्यत्वे सत्यव्यापकत्वे सत्ये ति नैवेकेन्द्रियग्राह्यत्वाद्रूप
वत्। कार्यस्य द्रव्यत्वे निरवयवत्वामूर्तत्वव्याघातात्। कर्मत्वे संयोगविभागानपेक्षकारणत्वप्रसंगात्। सा
75 मान्यादित्वे स्वलक्षणव्याघातादित्यादयस्तर्का ऊहनीयाः। भवत्वमीषां गुणत्वाद्द्रव्याश्रितत्वं तथापि शरी
राश्रयत्वमिन्द्रियाश्रयत्वं वा भविष्यतीत्यत आह नैवेति। कस्मादिति शिष्यस्याकांक्षायां हेतुमाह। अहंका न.त
रे ऐकवाक्यभावात् सामानाधिकरण्येनावबाधाविरोधादित्यर्थः। योऽहं सुखसाधनं स्रक्चन्दनादिकमु
पलभ्य तदुपादित्सुः प्रयतमानस्तदुपात्तवान् सोऽहं सुखी योऽहं दुःखसाधनमहिकंटकाद्युपलभ्यापिन राम
परिहृतवान् सोऽहं दुःखी योऽहं सुखं दुःखं वानुभूतवानस्मि सोऽहं तत्साधनमिदानीमुपलभ्यादातुमिच्छामि ७५
द्वेष्मि वेति। अनेन क्रमेण प्रतिसंधीयमानाः खल्विमे गुणाः सुखादयोऽनुभूयन्ते। इदं च प्रतिसंधीयमा

न त्वममीषामनेकाश्रयत्वया विरुध्यते वैत्रैमैत्रेवसुखादिषु प्रतिसंधानादर्शनात् । तथा च शरीरेंद्रियाणामपि प्रहें सपरि
माणभेदेन भिन्नत्वात् गुणानाममीषामप्रतिसंधानप्रसंगः । भिन्नाश्रयाणामपि वा प्रतिसंधाने चैत्रमैत्रादिगुणा
नामपि प्रतिसंधानापत्तिः ननु शरीरगुणा अपि प्रतिसंधीयंत एव तथा यो हं गौरः स्थूलः कृशः आसं सो हं
श्यामः कृषो दीर्घ इति ना तस्य भ्रांतत्वात् प्रकृतमपि प्रतिसंधानं भ्रांतं भविष्यति किं नः छिन्नमिति चेत्तु न ।
त्वात् स्मर्तुरभ्रांतेः अन्येन दृष्टस्यान्येनास्मरणात् । अन्यथातिप्रसंगात् तस्मात्प्रतिसंधातुर्देहादिभ्योन्यत्वे सिद्धे तत्
दधिकरणत्वे वसुखादीनामनुभूयमाने प्रयोगः । सुखादयो न शरीरेंद्रियगुणाः अहंकारेण समानाधिकर
णत्वात् स्मृतिवदिति । स्यादेतत् । प्रतिसंधानबलेन स्मृतिबुध्योर्देहाद्यनधिकरणत्वं सिध्यतु । देहादीनां भेदेन
प्रतिसंधातुं स्मर्तुं वा असमर्थत्वात् । सुखादयस्तु गौरत्वादिवद्देहधर्मा एव । भ्रांतिवशादहंकारसमाना

76

धिकरणतयाप्रतिसंधास्यंतइतिचेन्न।नाज्ञानेनभिन्नाधिकरणानांकार्यकारणभावनियमानुपपत्तेः नह्यन्योज्ञाना
त्सन्यइछत्यन्यःप्रयततइतिसंभवति।नयात्वेचैत्रेद्दृष्टरिमैत्रेचैषितरिजेत्रोपतेत।तस्मादेकाधिकरण्येनै[illegible]बा
मीषांकार्यकारणभावनियमोनान्यथेति।हेत्वंतरमाह।प्रदेशवृत्तित्वादिति।देहाद्यव्यापकत्वादित्यर्थः।सुखा
दयोनस्पर्शवद्विशेषगुणाः तदव्यापकत्वात्।येपुनस्तद्विशेषगुणातेतदव्यापकाः यथारूपादयइति।व्य
२५ तिरेकी।यद्वासंयोगवदित्यन्वयः।हेत्वंतरमाह।अयावद्द्रव्यभावित्वादिति।सत्येवस्पर्शवतिद्रव्येनिवर्तमा
नत्वादित्यर्थः।येपुनस्तद्विशेषगुणास्तेयावद्द्रव्यभाविनःयथारूपादयइतिव्यतिरेकी।संयोगादिवदितिपू राम
र्ववदन्वयोवा।अनयोस्तर्कः यदिस्पर्शवद्विशेषगुणाणेवस्युर्नियतबुद्धिकार्यानंभवेयुर्नियामकाभावाद्वि ७६
षयविषयिभावस्यानियामकत्वेचैत्रस्यबुध्या[illegible]मेत्रविषयिण्यामैत्रसमवेतस्यसुखादेरुत्पादप्रसंगादिति।

मुक्तावद्प:।२

स्यादेतत्। तथापि नाम्बाह्येन्द्रियगुणत्वममीषां निषिद्धं। शब्दे नव्यभिचारात्। नहि शब्दो यावद्द्रव्यभावी नापि श्रोत्रं व्या
प्यवर्त्तते। निमित्ताभिमुख्येन तत्संनिधिमपेक्ष्योत्पत्तेः। अन्यथाप्रत्यां शब्दः प्रतीत्यां नेंइन्द्रियसत्त्वानुपपत्तेरित्याशंक्य
हेत्वंतरमाह। बाह्येन्द्रियाप्रत्यक्षत्वादिति। मानसप्रत्यक्षत्वादित्यर्थः। न शरीरेन्द्रियगुणा इच्छादयः मानसप्रत्यक्ष
त्वाद्बुद्धिवत्। ज्ञानवैयधिकरण्येऽमीषां अप्रत्यक्षत्वप्रसंगः। तथापि प्रत्यक्षत्वे चैत्रेण मैत्रसमवेतानां इच्छादीनामुप
लंभापत्तिः। शरीरादिगुणानाममीषां चक्षुरादिग्राह्यत्वे अंधादिभिरनुपलंभप्रसंगः। मनोग्राह्यत्वे चैत्रमैत्राणामेषा न५
दिभिरपि रूपादीनामुपलंभापत्तिः। इन्द्रियसामर्थ्यनियमाद्रूपरसादिवद्विषयनियमो भविष्यतीति चेन्न। मनसः
सर्वविषयत्वान्नियतबाह्यविषयत्वे च मनस्त्वव्याघातादिति। अहं सुखी वा कामीयते सुखी दुःखी वा शोक्य न सुखो वा
युः कर्णे कटुरटति मनो मे दुःखितं मनसि मे हर्षः पादे मे सुखं शिरसि मे वेदनेत्यादिप्रत्ययात्। शरीरेन्द्रियगुणत्वेममी
षां शंकास्पदमिति तद्वत्प्रतिषिद्धं। अन्यगुणत्वं तु शंकैव नास्तीत्युपक्षितवान्। संप्रति पूर्वहेतुं नां चेष्टादीनां रथक

७१

मेण सारथिवत्क्रियादिदृष्टांतेषु विशेषविरोधाभासपरिहाराय प्रत्यक्षसिद्धं पृथिव्यादिव्यतिरिक्तं स्वात्मानमेव दृष्टांतयितुमिच्छामइ
त्यभिसंधाय प्रत्यक्षमाह। तथा चाहं शब्देनेति। शब्दः शब्दे न प्रत्ययमनुपलक्षयति यथा परात्मानुमीयते तथा प्रत्यक्षो हं तो प्र
त्ययेन स्वात्मा विषयीक्रियत इत्यर्थः। न त्वयमहं प्रत्ययो शब्दजो लिंगजो वा तदनुसंधानमंतरेण जायमानत्वात्। ननु पृ
थिव्यादिविषय एव भविष्यतीत्याशंक्य तर्कमाह। पृथिव्यादिशब्दव्यतिरेकादिति। पृथिव्यादिप्रत्ययवैयधिकरण्यादित्यर्थः।
यदि त्वयमहं प्रत्ययः पृथिव्यादौ भवेत् अहं पृथिव्यहमापइत्याद्याकारो भवेद्वयप्रत्ययवृत्त्न नैवं। स्यादेतत्। सामा
न्यतो मा भूद्विशेषतस्तु भविष्यति यथा कश्चित्पार्थिवो गौ घटादिर्न तु सर्वः। तथा कश्चित्पार्थिवो हं [illegible] मेत्र इति को विरो
धः। न। अहंकारस्य प्रतिसंधातृविषयत्वात् शरीरस्य भेदेन प्रतिसंधातृत्वादित्युक्तत्वात्। तन्मूलपरमाणवः स्थिर
त्वात् प्रतिसंधातृत्वे नाहंकारविषया भविष्यंतीति चेत्। न। तेषामतींद्रियत्वात्। अपि च शरीरगोचरत्वे स्वबाह्येंद्रियज
न्यत्वमापद्येत। तथा च चक्षुरादिव्यापारापगते हमिति प्रत्ययो न स्यात्। मानसत्वे स्य शरीरस्य तद्गुणानां गौरत्वादीना

राम
७७

मपिमानसत्वप्रसंगः। न हि निर्गुणं द्रव्यमुपलभ्यते। तथा चांशादीनामहंप्रत्ययवत् रूपप्रत्ययापत्तिरिति। तस्मात्परमार्थतः सामान्यो
ते विशेषतश्च सकलपृथिव्यादिव्यतिरेकादहंप्रत्ययस्तद्व्यतिरिक्तं द्रव्यमालम्बते। तथा च चेष्टादीनां हेतुत्वेनात्मकार्यत्वे सिद्धे
परत्रापि तत्सिद्धिः। रथवदित्यादौ मच्छरीरवदित्यादिविपरिणामेनोदाहरणस्य निरस्तपद्भवत्वादिति सर्वमवदातं॥६॥
नदेतद्वैनाशिकैरूपहस्यते। बुद्धेर्हि कार्यत्वात्तया यद्युपादानकारणमात्मा विवक्षितः स एव नो बुद्ध्यन्तरं। सुखादी
नां गुणानामाश्रयो द्रव्यं। तदपि च क्रियामात्रे क्षणिकत्वसिद्धावस्य षट्पदार्थीकाव्यस्य बाललालनार्थत्वात्॥
तथा हि। यत्सत्तत्क्षणिकं यथा घनः संश्च विवादाध्यासितः शब्दादिरिति। सत्त्वं तावद्यत्किंचिदस्तु परमते प्रसिद्धे त स
त्तावदर्थक्रियाकारित्वं बौद्धस्याधिवक्षितं तच्च भावानां प्रत्यक्षसिद्धं। व्याप्तं च क्रमयौगपद्याभ्यां न हि क्रमाक्रमा
भ्यामन्यः प्रकारः शंकितुमपि शक्यते। व्याघातस्योद्भवत्वात्। न क्रम इति निषेधादेवाक्रमोपगमात्। नाक्रम इ
ति निषेधादेव क्रमोपगमात्। नभ्युपगमे च प्रतिक्षेपो व्याहन्यत इति। तौ च क्रमाक्रमौ स्थिरेऽसंभवंतौ र्थक्रिया

:A.

मपि ततो व्यावर्त्तयतः। वर्त्तमानार्थक्रियाकरणकाले ह्यतीतानागतयोरर्थे त्वेतयोरपि करणप्रसंगात्। असमर्थं चेत्तु पूर्वापर
कालयोरप्यकरणापत्तेः। अथ समर्थोऽप्यपेक्षणीयाः संन्निधेर्न करोतीति तत्संन्निधेस्तु करोतीति चेत्। अथ किमर्थं सहकारि
78 णामपेक्षा किं स्वरूपलाभार्थम् उतोपकारार्थम् अथवा कार्यार्थं। न प्रथमः स्वरूपस्य स्वकारणाधीनस्य नित्यस्य नि
समर्थो त्यवात्स्वसिद्धत्वात्। न द्वितीयः। स्वयं सामर्थ्ये वा तस्यानुपयोगात्। सामर्थ्ये वा स्वयमेव कार्यं कुर्यात्। किं तेन। असाम राम
र्थ्ये तूपकारसहस्रेणापि न कुर्यात्। तथापि किं तेन। अत एव न तृतीयः। उपकारवत्सहकारिणामप्यनुपयोगादिति। ७८
अनेककारणाधीनस्वभावतया कार्यमेवापेक्षत इति चेत्। न। तस्यास्वतंत्रत्वात्। स्वातंत्र्ये वा कार्यत्वव्याघा
तात्। तद्वित्तत्साकल्येऽपि स्वातंत्र्यादेव न भवेदिति। अथ वा केयमपेक्षा नाम। किं तैः सह करोतीत्यन्वयपर्यवसि
तः स्वभावभेदः। अथ तैर्विना न करोतीति व्यतिरेकनिष्ठस्वरूपमेव। आहोस्वित्तैरुपकृतः करोतीत्युपकारभेदः।
न प्रथमः स्वभावस्य नादवस्थात्। न ह्यस्य सहकारिव्यावृत्तौ स्वभावस्य व्यावृत्तिः। ननु यत एव सहकारिव्यावृत्तौ ना

वस्य स्वभावो न व्यावर्त्तते। अत एव तैर्विना न करोति कुर्वाणो हि तैः सह करोतीति स्वभावं न ह्यात्। स तर्हि स्वभावभेदः सहकारि

साहित्ये सति कार्यकरणनियतः सहकारिणो न जह्यात्। प्रत्युत पलायमानानपि गले पाशेन बद्ध्वा नयेत्। अन्यथा स्व

भावहानिप्रसंगात्। अत एव न द्वितीयः। अकर्तृस्वभावापरावृत्तेः। अथ तद्विरहादकर्तृस्वभावं स्यात्। कालान्तरेपि स्वहेतुव

मा शात् उपसर्पतोपि सहकारिणं परार्णुद्यन कुर्यात् तद्विरहादकर्तृत्वमेवं खल्वयमिति। अथ सहकारिषु सत्सु कर्तृस्वभावः

तद्विरहे त्वकर्तृरूप इत्यभिप्रायः। किं रुद्धधर्माध्यासस्तर्हि भावं भिंद्यात्। न वायं कालभेदेन परिहर्त्तव्यः। धर्मिणोनतिरेकात्

अतिरेके वा स्यैवाद्यासिद्ध्यापत्तेः। तथा हि। सामर्थ्यासामर्थ्याभ्यामन्यो धर्मी स्वरूपेण न किंचिदेव स्यादिति। उपकारपक्षस्त्वे

कमुखानवस्थादुःस्थतया नोपन्यासस्यापि योग्यः। तथा हि। उपकारे हि कर्त्तव्ये सहकार्यं तदपेक्षया उपकारपरंपरा

पात इत्येका उपकारेणाप्युपकर्त्तव्यमिति तत्परंपरापात इत्यपरा। कर्त्तव्यस्य चोपकारस्य धर्म्यभेदे धर्म्येव क्रियेत भिन्ने

तु धर्मिणः किमायातं न ह्यन्यस्मिन् जाते नष्टे वान्यस्य स्वरूपे किंचिद्भवति अतिप्रसंगात्। अथ तेनापि तस्य किंचिदुपकारान्त

किं निरपेक्षः सापेक्षो वा न प्रथमः केवलादुपकारात् [illegible] किंचिदुपकारान्तर [illegible] पानव [illegible] हेतत [illegible] कोपि भावः। किं चिद्धित्वार [illegible]

रमाधेयमितित्तीयानवस्था। स्यादेतत्। क्षणिको हि भावः किं निरपेक्षः सापेक्षो वा न प्रथमः केवलाद्वल्सँहस्रेणापि कार्यानुत्पत्तेः। रत्न
न द्वितीयः। अनुपकारकापेक्षायामतिप्रसंगात्। तथा पुंजान्तर्जोऽस्मत्तौ बिजमपि पवनपाथस्तेजोऽङ्कुरान्करोतीति पक्षे किं येनैव स
79 भावेनाङ्कुरं करोतीति तेनैव पवनादीनन्येन वा। न प्रथमः कार्याणामभेदप्रसंगात्। न द्वितीयः एकस्यापि क्षणस्य स्वभावभेदे
नभेदापत्तेरिति। तदिदमशिक्षितोत्रासनं। साहित्यकरणलक्षणायां ह्यपेक्षायां क्षणिकस्यापि सापेक्षत्वादेव समर्थस्य सहका
र्यव्यभिचारात्। अन्यथा तु निरपेक्षमेव तैर्विना तस्यासत्त्वात्। सहकार्यनुपकार्यत्वाच्च। स्थिरस्तु भावस्तैर्विनाप्यस्तीर्थः।। राम
किं न कुर्यादिति दोषः। एकस्यैवानेककार्यकारिस्वभावस्य स्वकारणादुत्पत्तेः। कार्यभेदे न तस्य स्वभावभेदापादनस्यापि दूरनि ७९
रस्तनात्। न च स्थैर्यपक्षे न्यायः संभवति उत्पत्तेरनन्तरमेव तावत्कार्यकारणप्रसंगात् तदैव तस्य तत्क्षभवत्वादिति। एते
नैकजातीयेनेक[illegible]देशानाप्रसंगावपि निरस्तौ वेदितव्यौ।। तस्मात्क्रमयोगपद्ययोर्व्यापकयोर्व्यावृत्तेरक्षणिकाद्व्यावर्त
मानार्थक्रियाक्षणिके विश्राम्यतीति प्रतिबन्धसिद्धिः अन्वयेन वार्यद्विरुद्धधर्माध्यस्ततन्नानायथाशीतोष्णे कालभे

देनापि विरुद्धधर्माध्यासः अत्र विवादास्पदीभूतो भाव इति। न चायमसिद्धः सामर्थ्यासामर्थ्ययोः प्रसंगतद्विपर्ययसिद्धत्वात्। तथाहि।
स्व यद्यदा यज्जननसमर्थं तत्तदा तत्करोत्येव यथा सामग्री कार्यं समर्थश्चायं भावो वर्त्तमानार्थक्रियाकरणकालेऽतीतानागत
योरप्यर्थक्रिययोरिति प्रसंगः। स्वभावहेतुः सामर्थ्यमात्रानुबंधित्वादर्थक्रियाकारित्वस्य यद्यदा यन्न करोति तत्तदा
तत्र न समर्थं यथा शिलाशकलमंकुरे न करोति चैष वर्त्तमानार्थक्रियाकरणकालेऽतीतानागतेष्वर्थक्रियेति व्या
पकानुपलब्धिः प्रसंगविपर्यय इति।। राम।। अत्र संक्षेपतः किंचिदुच्यते। सत्त्वेनावदसिद्धव्याप्तिकतया व्याप्यत्वा
सिद्धमसिद्धभेदोऽस्माकं। संदिग्धविपक्षव्यावृत्तिकतया संदिग्धानैकांतिकप्रभेदो बौद्धस्य। न हि कुर्वद्रूपत्वाक्षेपक
रणधर्मत्वोत्प[illegible]त्यनंतरकारित्वादिशब्दवाच्यादन्या दृष्टा सामर्थ्यमुपादाय प्रसंगाद्यावकाशः। तथाभूतं च सं
दिह्यते न त्वेवंभूतत्वे भावस्य प्रत्यक्षमनुमानं वा संभवतीति। सहकारिषु सत्सु करोति असत्सु न करोतीत्ययमस्य
स्वभावो दर्शनानतिक्रमेणाभ्युपगम्यते।। अविरोधादुभयवादिसिद्धत्वाच्च। त्वयाप्येतदवश्याभ्युपगमनीयं। न पि

कोपि भावः कुर्वद्रूपः सहकारिभिः सहैव करोतीति नियतस्वभावः अन्यथा सहकारिणामसहकारित्वप्रसंगात्। अतोन्वयनिय
मैतैर्विना न करोतीत्येवंविधव्यतिरेकोप्यवर्जनीयः अन्वयव्यतिरेकयोरन्यतरनियमस्यान्यतरसिद्धौ नांतरीयकत्वादि
ति बौद्धस्थितेः तथा च तैर्विना कृतस्य करणमापद्यमानमापादकमेव व्याहंतीति। ननु तत्रोक्तं तैः सह करोतीति स्वभावा
४० भ्युपगमे सहकारिणो न जह्यात् प्रत्युत पलायमानानपि गले पाशेन बध्वा रुध्यान्नेयादिति। सत्यमुक्तं। आत्मानमवी
क्षमाणेन न तत्प्रकल्पितं। न चापि व्यतिरेकनियमे सहकारिण्यं स्वकारणादापततोपि निवार्य न कुर्यात् तैर्विना न करोति
तै. अस्य हि स्वभावः अथ सह करोतीत्ययमप्यस्य स्वभावः। एवं तर्हि विरोधः स्यात्। स्यादेतत्। स्वकारणाधीनसंनिध राम
प य सहकारिणस्तेषामुपनयापनययोरयमनीश्वर एव यद्युपनिबंधेन तद्व्यते यदि सहकारिणो न स्युर्न कुर्यादि ८०
ति तैर्विना समर्थो नास्तीति चेत्। नन्वस्माकमप्येवमस्तु स्वकारणाधीनसंन्निधीनां सहकारिणामुपनयापन
ययोरयमनीश्वर एव यद्युपनिबंधेन तद्व्यते यदि सहकारिणः स्युः कुर्यात्। न तु ते तदानीं संतीति। स्यादेतत्। तैः

सहकरोतितैर्विनानकरोतीत्ययमस्यस्वभावएवइत्यावयोःसमोऽभ्युपगमः किंत्वयंविशेषः तैःसहकरोतीतियोऽस्यस्वभावःसपक्षाद
प्यस्तिनवाप्ययमेपक्षादपिकुर्यात् नद्वितीयेत्वस्मन्मतापातइति। अथनवापिमतेतैःसहकुर्वतोयोऽस्यतैर्विनानकरोती
तिस्वभावःसयद्यस्तितदानकुर्यादेवनास्तिचेद्व्यतिरेकव्यावृत्तावन्वयव्यावृत्तिरितिस्वरूपहानिप्रसंगः स्वरूपमस्त्येव
तैर्विनाभावमात्रंतुनास्तीतिचेत्। ममाप्युत्तरकालंस्वरूपमस्तितत्साहित्यमात्रंतुनास्तीतिसमसमाधिः। तस्मात्सह
कार्यन्वयव्यतिरेकोपलक्षितमपेक्षितंवकार्यंतत्स्वरूपमेवभावानांतादृशंतदेवसामर्थ्यंपदार्थः। तदेवसहकार्यन्वयमपे
क्ष्याकुर्वदित्युच्यते। नव्यतिरेकमपेक्ष्यवाकुर्वदितियुक्तमुत्पश्यामः। अथवास्तुसमर्थासमर्थस्वभावः। तथापिक्षणि
कपक्षइवकालभेदादविरोधादसिद्धोविरुद्धधर्माध्यासः कथंयदापिक्षणिकाभावःस्वकालस्थैर्यकामपिकांचिद
र्थक्रियांकरोतितदातामेवार्थक्रियांकालांतरेकिंन्नकरोतीतिपरिभावय। असत्वादितिचेत्। किमत्रासत्वेननहिस
त्वप्रयुक्तंकरणंतथासतिदेशांतरेपिकिंन्नकुर्यात्तस्मान्नदेशोकालोवास्तुमावाभूत् यदिसमर्थस्तदाकरोत्येव॥ राम

अतएवस्वप्नांतिकंविज्ञानंप्रहर्षाद्यंतदिततमपिसुषुप्तस्यजागराद्यज्ञानमुत्पादयतीतिप्रज्ञाकरः। असामर्थ्यादेवतर्हिनकरोतीति
चेत्। तर्हितामेवार्थक्रियांप्रतिसमर्थोसमर्थश्चेत्यापतितं। कोदोषः कालभेदादितिचेत्। स्थिरेप्येवमेवादोषोस्तु। असत्त्वमेवासा व
मर्थ्यमितिचेत्। नाउक्तोत्तरत्वात्। सामर्थ्येस्वकालएववान्यदातामेवार्थक्रियांकुर्वाणोगीर्वाणेः शापेनापिनापहस्तयितुं
शक्यतेकिंपुनस्त्वामुनाममेपीडाजनितविकुवविक्रोशमात्रेण असामर्थ्येपितदापिनकुर्यात्। किंच। यस्यमते असत्त्वमप्य
धिकंनास्तिकिंतुसएवभावः तदाकथंनविरुद्धधर्माध्यासः एकस्यविधिनिषेधस्वभावानुपपत्तेः। कानुपपत्तिः साअतयद
यमस्तिकालांतरेनास्तीतिचेत्। सामर्थ्यासामर्थ्ययोरेवमस्तु। प्रथमंसमर्थस्यासमर्थस्यवापश्चात्स्वभावविपर्ययःकुत राम
आयातइतिचेत्। प्रथमंसतोसतोवापश्चादसत्त्वभावविपर्ययः। कुतइतितुल्योनुयोगः। नायंस्वभावविपर्ययः किंतुस्वदेशका ८१
लएवान्यदेशकालयोरसद्व्यवहारकारिस्वकारणादेवायातइतिचेत्। ममापितामर्थक्रियांप्रतीदानींसमर्थएवान्य
दानसमर्थइतिस्वकारणादेवायातइतितुल्यं। तस्मात्सार्थक्रियातेननतदैवकर्तव्यानान्यदेतिस्वभावनियमोप्युभयोर्दर्शी

नयोस्समानः। अन्यदा तु न कर्त्तव्येति क्षणिकपक्षे। अन्यदैव कर्त्तव्येति स्थिरपक्ष एवेति विशेषः। न चान्यदा करणे न दान त्वकरण
योः कश्चिद्विरोधः देशभेदे नार्थक्रियाभेद नियमवदुपपत्तेः तस्माद्देशकालविषयभेदेन करणाकरणे सामर्थ्यासामर्थ्ये
विरुद्ध एव न भवत इति। अन्यो विरुद्धधर्मोनुसर्त्तव्यः। स यत्र नास्ति तत्र क्षणवदनवधेरपि गगनादेरभेदोप्यवसातव्य इ
ति रहस्यं विस्तरस्त्वस्मात्मतत्वविवेके न्यायकुसुमांजलौ वानन्दबोधियां सुलभ इति। एवं स्थैर्ये सिद्धे नो बुद्धिर्बुद्धिरूपादानं गुण
त्वात्। न च गुणगुणिनोर भेदो विरुद्धधर्माध्यासादिति। संक्षेपतः सर्वं सुस्थं। स्यादेतत्। न किं सुखादय एवात्मनो गुणा यदेतैरेव गुण्य
नुमातव्यः। न चैतेर्वं बुद्धेर्द्दृष्टादीनां अगुणत्वे अन्यगुणत्वे वा बहु विप्लवेत। सुखादीनामपि चात्मगुणत्वं न सिध्येत्। संयोग
द्यभावे तेषां तद्गुणानां कादाचित्कत्वानुपपत्तेरित्याशंक्याह। तस्य गुणा इति। तेषां प्रसिद्धत्वेपि गौरवात्सूत्रकारानुमतिमाह।
आत्मलिंगाधिकार इति। प्राणादिसूत्रे बुध्यादयः प्रयत्नांताः सिद्धाः यद्यपि बुद्धिः स्वकंठरवेण नास्ति तथापि सुखादय एव स्वकार
णतया तामाक्षिपंति। न ह्यन्यसमवेतयेष्टबुध्यान्यसुखादिकमुत्पद्यते। न थात्वे देवदत्तेन दनस्पर्शमनुभवति यज्ञदत्त

स्यसुखमुत्पद्येत। इंद्रियांतरविकाराद्वाभेददर्शितत्वं विवक्षितत्वाबुद्धिगुणत्वमात्मनोदर्शितमितिभावः। धर्माधर्मौवात्मांतरगुणा
नामकारणत्ववचनादिति। विहितनिषिद्धाचरणेन धर्माधर्मौजायेतेचिरध्वस्तस्य कर्मणः कालांतरफलहेतुत्वानुपपत्तेः। तौकु
त्रजायेतेइत्यपेक्षायांसूत्रकारेणोक्तं आत्मांतरगुणानामात्मांतरगुणेष्वकारणत्वादिति अस्यार्थः। अन्यसमेताभ्यांधर्माध
४२ र्माभ्यांअन्यस्यसुखदुःखानुत्पत्तेः। उत्पत्तौवाकृतहानाकृताभ्यागमप्रसंगात्। नचान्यसमवेतत्वेपितत्प्रयुक्तत्वेननियमा
भविष्यतीतिवाच्यं। ऋत्विगादिष्वपिप्रसंगात्। दृष्टप्रयोजनापेक्षित्वेपितेषांनकर्तृत्वात्। नहिदृष्टापेक्षयातत्कृतत्वेकर्मणो सा ४
निवर्त्तते। तदयंप्रमाणार्थः। देवदत्तविशेषगुणप्रेरितभूतकार्याः तदुपगृहीताश्चशरीरादयः। कार्यत्वेसतितद्भोगसाधनत्वा राम
त्गृहादिवदिति ज्ञानेच्छिपितृयत्नाभ्यामपिपुत्रपितृगामिफलसिद्धिः। तदाश्रयापूर्वजननद्वारैवेत्यव्यभिचारः। अन्यकृ ८२
तेनकर्मणा अन्यत्रापूर्वोत्पत्तिरितिचशास्त्रसिद्धं। ऋत्विगादिनिवृत्तदेवं धर्माधर्मावात्मगुणौमुनेरनुमतौ। संस्कारेतदनुम
तिमाह।। संस्कारः स्मृत्युत्पत्तावितिः। अनेनात्ममनसोःसंयोगात्संस्काराच्चस्मृतिरिति स्मृतेःस्मारयति। नचान्यत्रसंस्कारेण

न्यत्र स्मृतिः। देवदत्तेनानुभूते यज्ञदत्तस्य स्मरणप्रसंगात्। अतोनुभवसमानाश्रयः संस्कार इत्यर्थः। व्यवस्थावचनात्संरथेति।।
नानात्मानो व्यवस्थात इति सूत्रं दर्शितं। द्रव्यत्वेन सामान्यतः संख्यायां सिद्धायां किं क्षित्यादिवदेकत्वं उत कालाशादिवदेकत्वमि
त्यतो नानात्वं दर्शितं तन्नान्तरीयकतया बहुत्वसंख्या दर्शितेत्यर्थः। अथ कोयं व्यवस्थानियमः। प्रथमं तावत्कश्चित्संसारी क
श्चिदपवृक्त इति। यदि एक एवायमात्मा शुकः प्रह्लादो वा मुक्त इति कोपरः संसरेत्। न चेयता कालेन नापवृक्त एव कश्चित्तथा स
ति नापवृज्यतेव। न ह्यनादौ संसारे यन्निरन्तं न दृश्यतीति संभवति। न च बंधमोक्षौ एकस्य संभवतो विरोधात्। अपरा च व्यवस्था क
श्चिदीश्वरः कश्चिदनीश्वर इति। न चेश्वरो नाम जगति नास्ति तत्सद्भावे यत्स्यहृतत्वात्। नाथ स्मदादयः स्वात्मनि सर्वज्ञत्वं सर्व
व ३ कर्तृत्वं वा गच्छति। उपदेशाद्यपेक्षत्वात्। इच्छाविघाताच्चेति। अन्या च व्यवस्था कश्चित्सुखी कश्चिद्दुःखीत्यादि। ननु पादे मे
सुखं शिरसि मे वेदनेति वच्छरीरभेदे नैकस्यापि सुखदुःखे यदि स्यातां को दोषः। न ब्रूमः। एकस्य सुखदुःखे न भवत इति। किं
तु योहं देवदत्तो दुःखी सोहं यज्ञदत्तः सुखीति प्रत्यभिज्ञानं स्यादिति ब्रूमः। अप्रतिसंधानमपि शरीरभेदे नैवोपपद्यते जन्मांत

रसुखादित्वितिचेत् । न । तत्संस्कारस्यासत्त्वात् । अभिभवादनुद्भवाद्वा तदनुत्पत्तेः । नचैवमिहापि स्यात् यज्ञदत्तवद्देवदत्तेप्यप्रती
संधानप्रसंगात् । अविद्यावशादात्मनोपि सुखदुःखादयोनात्मीयतया प्रतीयंत इति चेत् न । यज्ञदत्तवद्देवदत्ते नाप्यात्मीय
तयाप्रतिपत्तिप्रसंगात् । परमविदुषे[illegible]रेणास्मदादिदुःखस्य स्वीयतयाप्रतिसंधानापत्तेश्च । एतेन जीवानामियं व्यवस्था
ननु परब्रह्मण इति निरस्तं । यतो व्यवस्था अत एवात्मानस्तत्त्वतो भिन्नाश्चेति स्थितिः । परब्रह्मणि चेश्वरस्यान्यस्मिन् प्रमा
णाभावात् । अनेकात्म्यश्रुतिविरोध इत्यपि नास्ति मुमुक्षुणा सर्वं विहाय स्वात्मनिष्ठेन भवितव्यं । स एव एक एवेति तात्पर्याद्दृष्टि ।
पृथक्त्वमप्यत एवेति यतः संख्यात एव सिध्यति । अतः पृथक्त्वमपि संख्यानुविधानात्तस्येत्यर्थः । द्रव्यत्वेन परिमाणयोगित्वं स
त्याह । तथा वात्मेति । वचनादिति वै भवान्महानाकाशस्तथा वात्मेति सूत्रं स्मारयति । विभुत्वाद्यथाकाशं महत्तथा तत एव भ
वादात्मापि । महानित्यर्थः । विभुत्वमेव तस्य कुत इति चेत् । तत्कार्यस्य ज्ञानसुखादेः सर्वत्र दर्शनात् । शरीरस्य गत्यैव तदुपप
न्नमिति चेत् । न । अमूर्तत्वात्तदेव कुत इति चेत् । परमाणुत्वे अप्रत्यक्षत्वप्रसंगात् । असर्वगुणानधिकरणत्वप्रसंगाच्च ॥ आर

वयवित्वे अनियतत्वप्रसंगाच्च। आदिमत्तया वीतरागजन्मापत्तेश्चेति एवं सूत्रकारानुमतिप्रदर्शनच्छलेन बुद्ध्यादिषु परिमाणं। तेषु प्र
माणं दर्शितं संप्रति संयोगविभागवानात्माद्रव्यत्वात् पृथिवीवदिति। प्रमाणस्य तर्कमाह। संनिकर्षत्वादिति॥ सहकार्यंतरानपे
क्षस्यात्मनः सुखादिकरणत्वे तेषां सततोत्पत्तिः स्यात्। निमित्तमपेक्षितत्वे सर्वत्रोत्पत्तिप्रसंगात्। न चावशरीरावच्छेदेन तदु
त्पत्तिनियमो न स्यात्। शरीरेणात्मावच्छेदस्यैव संयोगादन्यस्यानुपपत्तेः। एवं च मनःसंयोगोऽसमवायिकारणत्वेन व्याख्या
तः। अदृष्टवदात्मसंयोगश्चेन्द्रियज्वलनपवनादिक्रियाकारणत्वेन बोद्धव्यः। तद्विनाशकत्वाद्विभाग इति यद्यात्मनि विभागो न स्यात्
उत्पन्नोऽपि संयोगो न विनश्येत्। आश्रयविनाशाभावादिति भावः॥ ॥राम॥ मनस्त्वाभिसंबंधान्मन इति॥ ॥मनस्त्वं
नाम सामान्यविशेषः। तदभिसंबंधान्मन इतरेभ्यो भिद्यत इत्यर्थः। ननु मन एवासिद्धं कुतो मनस्त्वमित्यत आह। सत्यपीति॥
यद्यस्मिन्सत्यपि कदाचिद्भवति तत्तदतिरिक्तापेक्षं यथा सत्यपि तुर्यादेः संनिकर्षे कदाचिद्भवति पटस्तदतिरिक्तकुविंदाद्यपे
क्षः। सत्यपि चात्मेन्द्रियार्थसंनिकर्षे कदाचिज्ज्ञानसुखादिकं भवति। तस्मात्तदतिरिक्तापेक्षं। यच्च तदपेक्षणीयं तदेव मन इ

स्यर्थः। अपेक्षणीयांतराभावे सदा कार्योत्पत्तिप्रसंगात्। व्यासंगे चैतन्नक्षणीयं तथा च क्वचिद्योगपद्याभिमानः शतपत्रपत्रशतव्य
तिभेदवदाशुभावादूहनीयः। अदृष्टमपेक्षणीयं भविष्यतीति चेत् न। तदितरसहकारिवकसाकल्ये तदसंन्निधेरनुपप
त्तेः। तदसंन्निधौ तदितरसाकल्यस्यानुपपत्तेरिति। लिंगांतरमाह॥ श्रोत्रादीति। स्मृतिः शरीरावच्छिन्नात्मसंयुक्तद्रव्यसा
ध्या कार्यत्वे सत्यात्मविशेषगुणत्वात्। रूपादिज्ञानवत्। यद्द्रव्यं तन्मन इति। श्रोत्रादिष्वन्यतमद्भविष्यतीति चेत्। अत
उक्तं श्रोत्राद्यव्यापार इति। अन्यथासमवायीकारणाभावे तदनुत्पादप्रसंगात्। विषयविप्रकर्षाद्यतद्व्यापारापरमो लक्षणीयः।
लिंगांतरमाह॥ बाह्येति। सुखाद्युपलब्धिरिंद्रियं श्रोत्रादिकमेव तत्साधनं भविष्यतीत्याशंक्योक्तं बाह्येंद्रियैः श्रोत्रादिभिर राम
गृहीतेति। यदि बाह्येंद्रियैः श्रोत्रादिभिः सुखादयो गृह्येरन्। बधिरादिभिरनुपलभ्यता स्यादित्यर्थः। सुखादीनां बुद्धेरन्य ८४
त्वे बुद्धेरस्वसंवेद्यत्वं च वक्ष्यते। एवं सिद्धे मनसि व्यक्तिभेदसिद्धो सत्यां नियतकार्यतया मनस्त्वमपि सेत्स्यतीत्यभिप्रायवा
नस्य गुणानाह। तस्येति। यद्यपि द्रव्यत्वादेव संख्यादिपंचकं सिद्धं तथापि सूत्रकारानुमतिप्रदर्शनव्याजेन विशेषं

यसाध्यानन्यसाधाकारित्वात्। रूपाद्युपलब्धिवत्।४

विवक्षन्नाह ॥ प्रयत्नेति । अणुत्वे हि मनसो बहुत्वमर्थसिद्धं । अन्यथा एकस्मिन्नेकत्र वर्त्तमानशरीराणां नरेतत्कार्यज्ञा
नादिन स्यात् । अतो बहुत्वे सत्येकस्मिन्नपि शरीरे तैर्बहुभिर्युगपत् ज्ञानोत्पत्तिप्रसंगस्तदव[illegible]स्तद्वरमेक
मेव विभु तदस्तीत्याशंक्य सूत्रे सूतोक्तं । प्रयत्नज्ञानायौगपद्यादेकं मनइति । एकैकस्मिन्शरीरे एकैकमेव मन
मौ॰ ११५१ इति प्रयत्नाज्ञानायौगपद्याज्ज्ञानावैणुत्वं च । प्रतिशरीरमेकत्वमनुमातव्यमित्यर्थः । एकं क्रमप्यत एव । संख्यानु थ ४
विधानादेवेत्यर्थः । तदभाववचनादणुपरिमाणं । तदभावादणुमनइति सूत्रकारवचनात् । तच्छब्देन पूर्वोक्तं
वैभवं परामृशति । तेन विभवाभावादित्यर्थः । विभवाभावश्च ज्ञानायौगपद्यात् । विभवे ह्येकेंद्रियग्राह्या इव नानें
द्रियग्राह्या अपि रूपादयो विषयाः सकृदेव ज्ञायेरन् । कारणयोगपद्यात् । तेन स्पर्शोन्यत्वादयः परेषां विभु
त्वहेतवः कालात्ययापदिष्टा वेदितव्याः । यद्येवमनः कथं तर्हि द्वित्रिच्छिन्नानामपि गृहगोधादिशरीराणां उत्पत्तनोद्व

त्तेनोपसर्पणादिचेष्टाविशेषाः। नह्यविभुनैकेनानेकाधिष्ठानं संभवतीति चेत्। तत्क्षणमेव पूर्वोत्पन्नप्रयत्नवशा
त्कर्मोपगृहीतांतःकरणवशादिति न किंचिदेतत्। अपसर्पणोपसर्पणवचनात्संयोगविभागाविति। अपसर्पणमु
पसर्पणमशितपीतसंयोगाः कार्यांतरसंयोगाश्चादृष्टकारिताइति सूत्रकारवचनात्। अपसर्पणं पूर्वशरीरविभाग
मनः हेतुर्मनःकर्म। उपसर्पणमुत्तरशरीरसंयोगहेतुः कर्म। ततः संयोगविभागोसिद्धौ। अन्यथा तदनुत्पत्तौ प्रत्यभि
6 वानुपपत्तिप्रसंगइति भावः। स्यादेतत्। मनसोतींद्रियत्वात्परत्वापरत्वव्यवहारायोगात्प्रयत्नादृष्टोपग्रहाच्च
क्रियोत्पत्तौ परत्वापरत्ववेगाभ्युपगमो निर्बीजइत्यत आह। मूर्तत्वादिति। मूर्तत्वस्यैतैः सहस्वभावतः संबंधात्ते
नतेनुमातव्याः। नहि प्रात्यक्षिकएव व्यवहार इति नियमः। धूमाद्यनुमितेवह्न्यादौ तद्व्यवहारप्रसंगात्। नाप्य
दृष्टाद्युपग्रहेण क्रियोत्पत्तौ वेगो न स्यात्। ज्वलनपवनादौ तदभावप्रसंगात् इति भावः। स्यादेतत्। मूर्तत्वाद्द्रव्या
रंभत्वं मनसः किं न स्यादित्यत आह। अस्पर्शत्वादिति। नहि मूर्तत्वस्य द्रव्यारंभकत्वेन सहस्वाभाविकः संबंधः

विपक्षेबाधकाभावात्। स्पर्शवत्त्वंवद्रव्यारंभेप्रयोजकं। द्रव्यारंभकत्वेस्पर्शोवत्तायांप्रमाणाभावात्। अनुपभोग्यत्वप्र
संगाच्च। तदीयकार्यांतरस्याभावादित्यर्थः। नचमूर्त्तत्वेनस्पर्शोनुमातव्यः तद्विरहेणवार्त्तत्वं। मूर्त्तस्यस्पर्शविरहेवि
रोधाभावात्। विभवाभावस्यपरममहत्त्वेनसहतद्विरोधादित्यतआह॥ क्रियावत्त्वान्मूर्त्तत्वंमनइतिप्रक्रमात्। क्रिया
वत्त्वेनवैभवमुपलक्षितंभवति। स्यादेतत्। करणत्वेनमनसः पूर्वज्ञातत्वंप्रतिषिद्धं। तदनुपपन्नं। ज्ञानकरण
त्वज्ञातत्वयोर्विरोधाभावात्। प्रयो[illegible]प्रयोज्ययोः कथमेकत्वमितिचेत्। तथापिभेदोस्तु। कुतस्त्वज्ञत्वमि
त्यतआह॥ साधारणेति। तथाचैवंभिप्रायेणप्रवृत्तिनिवृत्तीनस्यातांप्रत्युताभिप्रायविरोधप्रवृत्तिर्निवृत्तिः स्या
दितिभावः। यद्येवमनैंद्रियंनंतर्हिस्वार्थेगुणतः स्वरूपतश्चनपरार्थेअतींद्रियत्वादित्यतआह॥ करणभावा
दिति॥ मूर्त्तस्यविशेषगुणयोगःस्यात्। अन्यथाद्रव्यत्वमपिनस्यात्। मूर्त्तिसमानाधिकरणस्यद्रव्यत्वस्य
विशेषगुणवत्त्वव्याप्तत्वात्। अतआह॥ गुणवत्त्वाद्द्रव्यत्वमिति। अपिभवान्मूर्त्तत्वेपिगुणवत्त्वाद्विशेष

गुणरत्ते हि स्यापि द्रव्यत्वाविरोधादित्यर्थः। तथापि गुरुत्वद्रवत्वस्थितिस्थापकाभावे कथं क्रियावत्वं। वेगस्य क्रियो
त्तरकालीनत्वाद्। नहि मूर्त्तत्वमात्रेण क्रियेत्यत आह॥ ॥ अयत्नादृष्टपरिग्रहादिति क्वचित्प्रयत्नपरिग्रहादि ति
त्यर्थः॥ क्वचिददृष्टपरिग्रहादित्यर्थः। [redacted] इति शब्दः परिसमाप्तौ॥ ॥राम॥ ॥इ
त्युदयनाचार्यकृतौ किरणावल्यां द्रव्यपदार्थः समाप्तः॥ ॥श्रीरामचंद्रायनमः॥ ॥ ॥संवत्१६९८
सवंत्१५६३ विकृतिसंवत्सरे ज्येष्ठमासे शुक्लपक्षे प्रतिपत्तिथौ मुल्युपनामकरघुनाथसूनुना वा
सुदेवेनेदं किरणावलीनामाख्यप्रकरणं विश्वेश्वरपट्टने लिखितं स्वार्थं परार्थं चेति। श्रीरामचंद्रो सर्वदा ज
यं कुरु॥ ॥ ॥श्रीभवानीशंकराभ्यां नमः॥ ॥राम॥ ॥ ॥राम॥ ॥ ॥राम॥ ॥

राम ८६